वर्षम् – ७०
अङ्कः – १२
आश्विनः (अधिकमासः)
विक्रमाब्दः २०७७
युगाब्दः ५१२२
अक्टूबर, २०२०

ISSN 2249-698X

# भारती
## संस्कृत-मासपत्रिका

एकस्याः प्रतेः १५/–
वार्षिक–शुल्कम्
१५०/–
पञ्चवार्षिकशुल्कम्
७००/–
आजीवनसदस्यता
(१५ वर्षाणि)
२१००/–

प्रकाशन प्रत्येक माह की 1 तारीख




'भारती' संस्कृत–मास–पत्रिकायाः लोकार्पणं कुर्वन्तो मञ्चस्था विद्वांसोऽतिथयः



# विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | रावणो लोकरावणः | डॉ. नाथूलालसुमनः | ६ |
| ३ | रामगीताऽमृतम् | युगलकिशोरभारद्वाजः | १० |
| ४ | बीजमन्त्राणामर्थः महत्त्वञ्च | डॉ. रजनीशकुमारबारहठः | ११ |
| ५ | संस्कृतसाहित्ये सामाजिकं चिन्तनम् | जया शर्मा | १४ |
| ६ | विनायक-सहस्रबुद्धे | पण्डित राजेन्द्रमोहन शर्मा | १७ |
| ७ | प्रियं भारतम् | पं. रमेशचन्द्र शर्मा | १८ |
| ८ | विभक्तौ लिङ्गविशिष्टाग्रहणम् | डॉ. जगदीशप्रसाद जाटः | १९ |
| ९ | व्याकरणशास्त्रस्य प्रमुखप्रयोजनानि | डॉ. उषाकिरणयादवः | २१ |
| १० | समावेशिशिक्षायाः उपयोगिता महत्त्वं च | स्नेहलता शर्मा | २३ |
| ११ | पाठकविचाराः | डॉ. उषाकिरणयादवः | २४ |
| १२ | विष्णुपुराणस्य वर्ण्यविषयः | राजबाला महला | २५ |
| १३ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | २७ |
| १४ | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ३० |
| १५ | संस्कृतसमाचारः | सुदामा शर्मा, प्रबन्धसम्पादकः | ३५ |


## पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठं सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्ददेवगिरिः
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठं रेवासा )
स्वामी संवित् सोमगिरिः
( बीकानेरम् )
महन्तः प्रतापपुरी
( तारातरामठं बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकः
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः
प्रोफेसर शङ्करप्रसादशुक्लः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूकाः

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाईट : www.bhartipatrika.org

वर्षम् 70 अङ्कः -12
आश्विनः ( अधिकमासः )
विक्रमाब्दः 2077
अक्टूबर, 2020

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 150/-
पञ्चवार्षिकशुल्कम् 700/-
आजीवनसदस्यताशुल्कम् 2100/- ( 15 वर्षाणि )

सम्पादकीयम्

# सत्यप्रियं गान्धिवरं स्मरामः

...✍ **प्रोफेसर श्रीकृष्णशर्मा**

महात्मा गान्धी 02 अक्तूबर, 1869 दिनाङ्के गुर्जरप्रदेशस्य पोरबन्दरनगरे कर्मचन्दगान्धिनस्तनूज-रूपेण 'पुतली बाई' मातुर्गर्भाज्जनिं यदाऽलभत, ततः प्राक् ब्रिटिश-सर्वकारः 1857 खिष्टाब्दे दन्दह्यमानां क्रान्तिं सर्वथाऽदमत्। भारतीयास्तदानीं सामाजिक-आर्थिक-धार्मिकशोषणैस्सन्त्रस्ताः सञ्जाताः सन्तोऽपि सशक्त-राजनैतिकनेतृत्वाभावे ब्रिटिश-शासन-मुन्मूलयितु-मभिलषन्तोऽपि चोत्पाटयितुं नाऽशकन्। 1885 खिस्टाब्दे यद्यपि भारतीयपक्षधरस्य 'ए.ओ. ह्यूम' इत्यस्य मार्गदर्शने 'भारतीय-राष्ट्रिय-काँग्रेस' इति संस्था भारतीयानां पराधीनतामुक्तये संस्थापिताऽऽसीत् तथापि सर्वमान्यनेतुरभावे त्वरित-गतिमती नाऽलक्ष्यत।

आसु परिस्थितिषु मोहनदास-करमचन्द-गान्धी 'दक्षिण-अफ्रीका' देशतो प्रवासकालानन्तरं समागत्य भारतराष्ट्रे **1915** ईशवीयवर्षे प्राकाटीत्। वर्षद्वयं यावदखिले राष्ट्रे सम्भ्रम्यन् भारतराष्ट्रस्य राजनीतिकपरिस्थितीरवागमत्। **1917** खीष्टाब्दे सक्रियराजनीतौ स भारतं स्वतन्त्रयितुं सम्प्रविवेश।

**1917** तम ईशवीयवर्षे बिहारप्रदेशस्य '**चम्पारन**' जनपदे 'तिनकठिया' पद्धतिम्प्रति कृषकाणामसन्तोषं गान्धी अबोधीत्, तेषामान्दोलनं समर्थ्य नेतृत्वमप्यकार्षीत्। गान्धिनः सत्याग्रहस्य तर्जनमवबुध्य 'ब्रिटिश' सर्वकारोऽवनत आसीत्, 'तिनकठिया' पद्धतिश्च परिसमापत्। गान्धिनश्चेदं **प्रथमं** सफलनेतृत्वम्।

तदनन्तरं सन् **1918** वर्षे गुर्जरप्रदेशे '**खेडा किसान-आन्दोलन**' इत्यस्य अनावृष्टौ दुर्भिक्षेऽपि सम्पूर्णं राजस्वसङ्ग्रहणं कर्तुमुद्यत आसीद् 'ब्रिटिश' सर्वकारः। गान्धिनः सक्रियत्वात्तत्रापि शैथिल्यं प्रदत्तं कृषकेभ्यः।**द्वितीयमिदं** गान्धिनो नेतृत्वम्।

**1918** तमे वर्षे एव 'अहमदाबाद' नगरे '**महामारी**' (Plague) प्रासरत्। श्रमिका उद्योगस्वामिनः (Mill-owners) अधिकं वेतनं (Bonus) प्रार्थयन्त। गान्धी तत्रापि समर्थनं कृतवान्। 15% अधिकं वेतनं श्रमिकैरवाप्तम्। **तृतीयमिदं** गान्धिनो नेतृत्वम्।

प्रथमे विश्वयुद्धे 'तुर्की' देशस्य पराभवः सञ्जात इत्यस्माभिः ज्ञायते। 'ब्रिटिश-सर्वकारः' तुर्की-सामग्राज्यं विघटयितुं निरचैषीत्। तत्रत्यं धर्मगुरुं (खलीफां) अपदस्थमकरोत्। भारतीया मुस्लिमधर्मा-वलम्बिनो व्यरुधन्, यतश्चैते तुर्कीदेशस्य शासकं (सुलतानं) आत्मनो धर्मगुरुं मन्यन्ते स्म। **1919 तमे** वर्षे गान्धी मुस्लिमानाम् आंग्लसर्वकारं प्रति विरुद्धस्वरं समर्थ्य 'खिलाफत-कमिटी' इत्यस्याध्यक्ष्यमपि निरवहत्।

इत्थं महात्मा-गान्धी स्वबुद्धिकौशलेन श्रमिकवर्गस्य, कृषकवर्गस्य मुस्लिमवर्गस्य च सफलनेतृत्वं विधाय राजनीतौ राष्ट्रियो नेताऽभूत्।

स्वतन्त्रताप्राप्तये गान्धी **बृहदान्दोलनत्रयम्** अनुष्ठितवान्।

**1. असहयोगान्दोलनम्** -अस्य मूलमासीत्- '**रौलट् एक्ट**' तथा '**जलियाँ बाला बाग-घटना**'। अधिकारपत्रं (warrant) विनापि, अभियोगं विनापि वा कमपि जनं बन्दीकर्तुं शक्नोति राजपुरुषः, वर्षद्वयं यावत् कारावासे स्थापयितुं शक्नोति इत्येष नियमो 'ब्रिटिश' सर्वकारस्य प्रस्तोष्यमाणः 'रौलट् एक्ट्' इत्यासीत्। 'जलियाँ वाला बाग' काण्डे तु 13 अप्रैल, 1919 तम ईशवीयवर्षे सहस्राणि निरपराधिनो जना

नृशंसतया घातिताः। एतयोर्द्वयोर्घटनयोर्विरोधे सर्व-कारीयकार्येऽसहयोगो व्यधत्त। परिणामतो राजकीय-कार्याणाम् उत्सवानाञ्च बहिष्कारः वैदेशिकवस्तूनां वस्त्राणाञ्च बहिष्कारः न्यायालयकार्याणाम् राजकीय-महाविद्यालयविद्यालयेषु अध्ययनाध्यापनादीनाञ्च बहिष्कार इत्यादिकं संवृत्तम्। इदं 1920-21 ई. वर्षे जातम्।

**2. सविनय-अवज्ञाऽऽन्दोलनम्** (1930-34 वर्षेषु)- लार्ड इर्विन-समक्षं गान्धी **एकादश** अभ्यर्थनाः प्रास्तौत्, तथा हि- मदिरानिषेधः, लवण-कर-समाप्तिः, कृषि-शुल्के 50% व्यवकलनम्, सैन्यव्यये वृद्ध्यवरोधः, राजनीतिकबन्दिनां मुक्तिरित्यादयः। आसामस्वीकरणादिदमान्दोलनमासीत्। फलतः 12 मार्चतः 5 अप्रैल, 1930 दिनाङ्कं यावत् साबरमती-आश्रमतो दाण्डीयात्रया 'लवण-कर-नियमः' उल्लंघितः।

3. **'भारत छोडो' आन्दोलनम्** (1942-1944 ई. वर्षे) - 09 अगस्त, 1942 दिनाङ्के 'कुरु' अथवा '**म्रियस्व**' इति आक्रोशवाक्येन (SLOGAN) आङ्ग्लशासकानां समक्षं 'त्यजत भारतम्' (Quit India) इत्येवमासन्नापद्-प्रबोधनं वर्षद्वयं यावद् विहितं गान्धिनो नेतृत्वे भरतीयैः।

एभी राष्ट्रियान्दोलनैः ब्रिटिश-सर्वकारः निर्मूल इव सञ्जातस्तेन भारतवर्षस्य स्वातन्त्र्यमार्गोऽपि प्रशस्तोऽभवत्। वर्षद्वयानन्तरं भारतदेशः स्वतन्त्रो जातः। परम् गान्धिनः सशक्तविरोधे सत्यपि अखण्डं भारतं विभक्तमभवत्। अनेन महात्मनः स्वातन्त्र्यं प्रति मोह-भङ्गोऽजायत। गान्धिनो जीवन-वृत्तान्तलेखकस्य पङ्क्तीनां भाषान्तरणमस्ति- **'विश्वस्मिन् देशे महोत्सवः समायोजितः परं स जनः, यो वैदेशिक-शासनाद् भारतं स्वतन्त्रयितुं सर्वाधिकमुत्तरदायी आसीद्, एषु आह्लाद-क्षणेषूपस्थितो नासीद्'।**

**वैश्विक-सन्देशः** - महात्मा गान्धी सत्याहिंसयोः समुपासक आसीत्। स दृढं विश्वसितिस्म यत् सत्यमेवेश्वरः, ईश्वरः सत्यमेव वेति। सत्यरक्षार्थं स सत्याग्रहेण राष्ट्रियगतिविधीन् समचालयत्। तस्य सत्यप्रियता सनातनधर्मप्रेरिताऽऽसीदिति मन्यामहे, यथा

**'अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।**
**एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः।।'**

मनुस्मृतिः, 10/63

**'सत्यमेव जयते जयति वा'** - (मुण्डकोपनिषद्, 3.1.6) इत्यादिकं भारतीयसंस्कृतिग्रन्थेषूपवर्णितमेव।

गान्धिनो जीवनं **योगेन** प्रवर्तितमासीद्। स महर्षिणा पतञ्जलिना प्रोक्तानां यमानां सेवनं साधु विहितवान्। ते च **यमाः** सन्ति-

**'अहिंसा-सत्यास्तेय-ब्रह्मचर्यापरिग्रहाः'** इतिः।

-पातञ्जलयोगदर्शनम्, 2/30

अहिंसा, सत्यम्, अस्तेयम्, ब्रह्मचर्यम्, अपरिग्रहः- एते पञ्च यमाः गान्धिनः सम्पूर्णजीवने सर्वैरवलोकितम्। 'सत्ये सर्वं प्रतिष्ठितम्' इति तस्य राद्धान्तः।

अपरिग्रहात्मकस्वत्वस्य भागवते प्रदत्तं लक्षणं महात्मनि सर्वथा संघटते-'**यावद् भ्रियेत जठरं तावत् स्वत्वं हि देहिनः। अधिकं योऽभिमन्येत स स्तेनः दण्डमर्हति।।**' श्रीमद्भागवतपुराणम्, 7.14.8

सत्याहिंसारूपशस्त्राभ्यां सह यमान् पालयित्वा गान्धी विश्वजिद्रूपेण विश्वस्मिन् विश्वेऽधुनापि सम्प्रतिष्ठितः, वैश्विकरूपेणाऽऽदर्शतोऽधुना सर्वथा प्रासङ्गिकस्तं वयं भावाञ्जलिभिः **महात्म-गान्धिनं 150 तम-जयन्त्यवसरे सादरं प्रणमामः।**

**व्याकरणपीठाध्यक्षचरः, जगद्गुरु-रामानन्दाचार्य-**
**राजस्थान-संस्कृत-विश्वविद्यालयः, जयपुरम्**
**दूरभाषाङ्कः 8386943655**

# रावणो लोकरावणः

❑ डॉ. नाथूलालसुमनः

वयं जानीमः यत् रावणः शिवभक्त आसीत्। किन्तु सः शिवभक्तः किमर्थमासीत् इति अनया कथया स्पष्टं भवति। वाल्मीकीयरामायणस्य उत्तरकाण्डे एषा कथा अस्ति।

रावणः बलशाली आसीत् किन्तु केचन एतादृशाः वीराः अपि आसन् ये रावणापेक्षया अपि बलशालिनः आसन्। पराजितो भूत्वा रावणः तैः सह सन्धिं कृतवान्। रावणस्य तु एषा एव नीतिः आसीत्-ये तस्य अपेक्षया न्यूनबलशालिनः आसन् तान् एव सः पीडितवान्, ये बलशालिनः आसन् तैः यह सन्धिं मैत्रीं च कृतवान्।

चतुर्दशवर्षाणि यावत् वनवासकालं पूर्णं कृत्वा लंकाविजयानन्तरं श्रीरामः अयोध्याम् आगतवान्। तत्र श्रीरामस्य राज्याभिषेकः सम्पन्नः। तस्य राजसभायाम् अनेके ऋषयः आगतवन्तः, श्रीरामः तैः सह प्रतिदिनं धर्मचर्चां करोतिस्म। धर्मचर्चायाः प्रारम्भे अगस्त्यमुनिः राक्षसवंशस्य वर्णनं कृतवान्। अस्मिन् एव क्रमे पुलस्त्यमुनेः तस्य पुत्रस्य विश्रवामुनेः, विश्रवापुत्रस्य कुबेरस्य च उत्पत्तेः वर्णनं सः श्रावितवान्। विश्रवामुनेः द्वितीया पत्नी आसीत् कैकसी, त्रीन् पुत्रान् एकां पुत्रीं च प्राप्तवती सा। दशाननः, कुम्भकर्णः विभीषणश्च अस्याः पुत्राः आसन्, शूर्पणखा च अस्याः पुत्री। दशाननः, कुम्भकर्णः विभीषणश्च एते त्रयः मातुः आज्ञया तपस्यां कृतवन्तः। दशाननः तपोबलेन ब्रह्मणः वरं प्राप्तवान्।

ब्रह्मणः वरं प्राप्य दशाननः स्वज्येष्ठभ्रातरं विमातापुत्रं कुबेरं पराजितवान्, तस्य पुष्पकं विमानम् अपहृतवान्, लंकापुरीम् अपि प्राप्तवान्। तदनन्तरं दशाननः पुष्पकविमानम् आरुह्य प्रतिदिनं यत्र-तत्र भ्रमणं करोति स्म, जनान् पीडयति स्म। एकस्मिन् दिवसे दशाननः स्वमंत्रिभिः सह पुष्पकविमानम् आरुह्य शरवणवनं गतवान् यत्र कुमारकार्तिकेयस्य जन्म अभवत्। वनस्य शोभां दृष्ट्वा सः समीपस्थं पर्वतम् आरोढुं प्रयत्नं कृतवान्, किन्तु तत्र पुष्पकस्य गतिः अवरुद्धा जाता, सः अग्रे गन्तुं न शक्तवान्। एतद् दृष्ट्वा दशाननः स्वमंत्रिभिः सह विचारविमर्शम् आरब्धवान्-कथं विमानस्य गतिः अवरुद्धा, किं कारणम् अस्ति इति। तदानीमेव तत्र अकस्मात् शिवस्य पार्षदः नन्दीश्वरः आगतः। नन्दीश्वरः विकरालः बलवान् च आसीत्, सः दशाननं वदति- हे दशानन! निवर्तस्व, अर्थात् स्वगृहं गच्छ, अत्र शिवः क्रीडति। अत्र सर्वेषां प्राणिनां गमनागमनं निषिद्धम्, एषः पर्वतः अगम्यः अस्ति। नन्दीश्वरस्य वचनं श्रुत्वा दशाननः बहु कुपितः जातः। सः पुष्पकविमानात् अवतीर्य वदति- ''कोऽयं शंकरः।'' इति उक्त्वा दशाननः पर्वतस्य मूलभागम् आगतवान्। तत्र अपि भगवतः शिवस्य समीपे त्रिशूलं धृत्वा नन्दीश्वरः अपरः शिव इव स्थित आसीत्। नन्दीश्वरस्य मुखं वानरस्य मुखमिव आसीत्। तं वानरमुखं नन्दिनं दृष्ट्वा दशाननः तस्य उपहासं कृतवान्। नन्दी तु अपरः शिव एव आसीत् अतः दशाननस्य व्यवहारेण कुपितो भूत्वा अवदत्-अरे दशानन! त्वं मम वानररूपस्य उपहासं कृतवान्, अवज्ञां च कृतवान् अतएव तव कुलस्य विनाशार्थं मादृशाः पराक्रमशालिनः वानराः उत्पत्स्यन्ते। ते वानराः तव दर्पस्य उत्सेधं करिष्यन्ति। यद्यपि अधुना अहम् अपि त्वां हन्तुं समर्थोऽस्मि तथापि न हन्मि, यतो हि त्वं तु स्वस्य कुत्सितकर्मभिः पूर्वमेव हतः असि।

नन्दीवाक्यं श्रुत्वा दशाननः तस्य अवज्ञां कुर्वन् इतोऽपि पर्वतसमीपं गतवान् तथा च शिवं प्रति उक्तवान्- हे पशुपते! तव पर्वतस्य कारणेन मम पुष्पकस्य गतिः अवरुद्धा, अतएव अहम् इमं पर्वतमेव उन्मूलयामि। एवम् उक्त्वा दशाननः पर्वतस्य मूले स्वभुजान् स्थापयति, पर्वतं च उत्तोलयति, तेन सः पर्वतः कम्पायमानः भवति। पर्वतस्य कम्पनात् शिवस्य गणाः भयभीताः अभवन् देवी पार्वती अपि विचलिता जाता। तदानीं शिवः स्वस्य पादाङ्गुष्ठेन पर्वतं लीलया किंचित् पीडयामास अर्थात् किञ्चित् नुदति। एवं दशाननस्य भुजाः पीडिताः, सः स्वभुजान् बहिः निष्कासयितुं न शक्तवान्। एतद् दृष्ट्वा तस्य मंत्रिणः अपि विस्मिताः।

दशाननः स्वभुजानां पीडनात् रोषात् च उच्चैः रोदिति। तस्य आर्तनादेन लोकत्रयम् अपि ''किम् अभूत्'' इति विचिन्त्य कम्पितं विस्मितं च। तदानीं तस्य मंत्रिणः उक्तवन्तः यत् हे राजन्! भवान् स्तुतिभिः महादेवम् एव तोषयतु। हे दशानन! महादेव एव भवतः शरणं, संतुष्टः स एव भवन्तं मोचयिष्यति। शिवस्तु कृपालुः अस्ति। सचिवानां वचनं श्रुत्वा दशाननः शिवं प्रणम्य विविधैः स्तोत्रैः सामभिश्च तं स्तौति। एवं स्तूयमानस्य पीडया रुदतश्च तस्य एकसहस्रं वर्षाणि गतानि। तत्पश्चात् प्रसन्नः महादेवः दशाननस्य भुजान् मुक्त्वा वदति-हे वीर! अहं प्रसन्नोऽस्मि। पर्वताक्रान्तेन त्वया दारुणः रावः (रोदनं) कृतः ''यस्मात् लोकत्रयं रावितं, तस्मात् त्वं नाम्ना **रावणो** भविष्यसि।'' रावणः अर्थात् रावयति रोदयति लोकान्। सर्वेऽपि प्राणिनः त्वाम् रावणं **लोकरावणम्** इति कथयिष्यन्ति। अधुना मम आज्ञया त्वं येन मार्गेण गन्तुम् इच्छसि तेनैव मार्गेण गच्छ। अहं त्वाम् आज्ञापयामि।

महादेवस्य वचनं श्रुत्वा रावणः वदति- हे महादेव! यदि भवान् प्रसन्नः अस्ति तर्हि याचकाय मह्यं वरं देहि। देवदानवगन्धर्वैः, राक्षसैः यक्षोभिः नागैश्च अवध्यत्वं दीर्घम् आयुश्च मया ब्रह्मणः प्राप्तम्। मनुष्यान् तु अहं न गणयामि एव, ते तु अल्पबलशालिनः सन्ति। मम आयुषः यः भागः अत्र नष्टः सः पूर्णः भवतु अपि च एकं शस्त्रम् अपि प्रयच्छ त्वम् मह्यम्। याचमानस्य रावणस्य वचनं श्रुत्वा प्रसन्नः शङ्करः तस्मै महादीप्तं चन्द्रहासं खड्गं दत्तवान्, तस्य आयुषः नष्टं भागम् अपि पूरितवान्, अर्थात् आयुषः एकसहस्रं वर्षाणि इतोऽपि दत्तवान्। चन्द्रहासं दत्त्वा शिवः एवमपि उक्तवान् यत् कदापि अस्य तिरस्कारः अवज्ञा च न करणीया, यदि करिष्यसि तर्हि एषः पुनरपि माम् एव आगमिष्यति। एवं महेश्वरात् नूतनम् अभिधानम् शस्त्रं च प्राप्य रावणः पुष्पकम् आरुह्य महादेवम् अभिवाद्य च ततः आगतः। तदनन्तरं रावणः शिवस्य परमभक्तः जातः। एवं स्पष्टं भवति यत् रावणः शिवस्य सामर्थ्यं ज्ञातवान्, अत एव तस्य भक्तः जातः। अत्र तस्य चातुर्यम् अपि प्रकटीभवति। संतुष्टेन शिवेन मुक्तः सः एवमेव न आगतः। शिवस्य प्रसन्नतायाः सदुपयोगं कृतवान्, तस्मात् नष्टायुषः पुनः प्राप्तिः, वरं चन्द्रहासं च प्राप्तवान्।

महादेवात् वरं प्राप्य तस्य भक्तः भूत्वा रावणः दिग्विजयार्थं पृथिवीतलं अभ्रमत्, क्षत्रियान् अपीडयत् च। एवमेव भ्रममाणः रावणः एकस्मिन् दिवसे माहिष्मतीं पुरीं प्राप्तवान्, माहिष्मती पुरी नर्मदातटे स्थिता आसीत्। वर्तमानकाले मध्यप्रदेशे इन्दौरनगरतः दक्षिणस्यां दिशि खरगौन जनपदे नर्मदातटे स्थितं महेश्वरनगरमेव प्राचीन-काले **माहिष्मती** पुरी आसीत्। बाहुबलीछायाचित्रे अपि माहिष्मती-नगरस्य उल्लेखः वर्तते। तत्रत्यो राजा कृत-

वीर्यस्य पुत्रः अर्जुनः आसीत्। तस्मिन् दिवसे अर्जुनः स्वस्त्रीभिः सह जलक्रीडार्थं नर्मदां गतवान्। रावणः अर्जुनस्य अमात्यैः ज्ञातवान् यत् अर्जुनः अत्र नास्ति, नर्मदां गतवान्, अतएव सोऽपि नर्मदातटम् प्राप्तवान्। तत्र सः अर्जुनं न प्राप्तवान्, किन्तु रावणः तस्य मंत्रिणः सर्वेऽपि नर्मदायां स्नानं कृतवन्तः। स्नानानन्तरं रावणस्य मंत्रिणः शिवपूजार्थं पुष्पाणि आनीतवन्तः। रावणः स्वप्रवासकाले स्वर्णनिर्मितम् एकं शिवलिङ्गम् स्थापयित्वा शिवपूजनम् आरब्धवान्, नर्मदा तु पूर्वतः पश्चिमदिशां प्रति प्रवहति। ततः किञ्चिद्दूरे पश्चिमदिशि अर्जुनः स्वनारीभिः सह जलक्रीडां कुर्वन् आसीत्। अर्जुनः **सहस्रबाहुः** आसीत्। अर्थात् तस्य एकसहस्रं भुजाः आसन्। स्वभुजानां बलं ज्ञातुम् अर्जुनः बाहुभिः नर्मदावेगं रुरोध, अर्थात् नर्मदायाः जलप्रवाहं बाधितवान्। बाधितः जलप्रवाहः विपरीतदिशि पश्चिमतः पूर्वदिशि रावण-समीपम् आगतः। नर्मदाजलस्य अयं वेगः वर्षाकाल इव तीव्रः आसीत् अतएव रावणस्य सकलं पुष्पोपहारं प्रवाहितवान्। रावणस्य पूजा अपि न समाप्ता मध्ये एव विघ्न आपतितः । सः नदीप्रवाहम् अन्वेष्टुं अमात्यान् हस्तसंकेतेन आदिष्टवान्, यतो हि मौनं धृतवान् अतः शब्दं न उच्चारितवान्। अमात्याः पश्चिमाभिमुखाः भूत्वा आकाशमार्गेण प्रस्थिताः। अग्रे गत्वा ते जलक्रीडारतं बलशालिनं पुरुषं नारीभिः सह दृष्टवन्तः। ते आगत्य रावणं सूचितवन्तः।

रावणः ज्ञातवान् यत् स अर्जुनः एव अस्ति। अतः तेन सह योद्धुं गतवान्। प्रथमं तु अर्जुनस्य सेवकैः सह रावणस्य अमात्यानां युद्धम् अभवत्। युद्धस्य कोलाहलं श्रुत्वा, अर्जुनः जलाद् बहिः आगत्य गदाम् आदाय योद्धुम् आरब्धवान्। पूर्वं तु रावणस्य मंत्रिभिः सह युद्धं कृतवान्, तान् जित्वा अनन्तरं रावणेन सह युद्धं कृतवान्। एवं सहस्रबाहोः अर्जुनस्य विंशद्बाहोः रावणस्य च भीषणं युद्धम् आरब्धम्। अन्ततो गत्वा पराजितं रावणम् अर्जुनः गृह्णाति रज्ज्वा बध्नाति च। रज्ज्वा बद्धं रावणम् आदाय अर्जुनः स्वनगरम् प्राप्तवान्। रावणस्य ग्रहणं बंधनं च तस्य पितामहः पुलस्त्यः मुनिः अपि स्वर्गलोके श्रुतवान्। पुत्रकृतस्नेहात् परवशः मुनिः माहिष्मतीपुरीम् प्राप्तवान्। तत्र आगत्य अर्जुनद्वारा कृतां पूजां स्वीकृत्य, तस्य सर्वविधकुशलं पृष्ट्वा पुलस्त्यः उवाच- हे राजन्! तव बलम् अतुलम्, दशग्रीवः त्वया जितः। दुर्जयः मम पौत्रः त्वया बद्धः। मम पौत्रस्य रावणस्य यशः त्वया पीतम्, स्वयशः विस्तारितम्। हे वत्स! मया याचमानः त्वं दशाननं मुञ्च इति अहं याचनां करोमि। पुलस्त्यमुनेः आज्ञया अर्जुनः रावणं बंधनमुक्तं कृतवान्। द्वयोः परस्परं मैत्रीसम्बन्धः जातः। किन्तु रावणः तु लज्जितः जातः। सः अर्जुनात् पराजयं प्राप्तवान्।

अर्जुनेन विमुक्तः रावणः पुनरपि दर्पयुक्तो भूत्वा समग्रां पृथिवीं विचरति स्म। एकस्मिन् दिवसे रावणः किष्किन्धानगरीं गत्वा बालिनम् युद्धाय आहूतवान्। वर्तमानकर्नाटकप्रान्ते तुंगभद्रानद्याः तटे स्थितं हम्पीनगरमेव प्राचीना **किष्किन्धानगरी** आसीत्, तत्रैव ऋष्यमूकपर्वतः अपि अस्ति। तदानीं बाली संध्योपासनार्थं दक्षिणसमुद्रं गतवान्। अङ्गदसुग्रीवादयः रावणं तथा सूचितवन्तः। रावणस्तु पुष्पकम् आरुह्य युद्धेच्छया दक्षिणसमुद्रं प्रति प्रस्थितवान्। दक्षिणसमुद्र-तीरे रावणः संध्योपासनतत्परं बालिनं दृष्टवान्। रावणः बालिनं ग्रहीतुम् अग्रे गच्छति। बाली अपि रावणं दृष्टवान्, तस्य मनोभावं च ज्ञातवान्। यदा रावणः समीपम् आगतः तदा यथा गरुडः सर्पं गृह्णाति तथा बाली पूर्वमेव रावणं

गृहीतवान्। बाली रावणं गृहीत्वा, कक्षावलम्बिनं कृत्वा वेगेन आकाशमार्गेण गच्छन् क्रमशः सर्वान् सागरतटान् गत्वा संध्योपासनं कृतवान्। बाली दक्षिणसमुद्रतटात् क्रमशः पश्चिमसमुद्रतटम्, उत्तरसमुद्रतटं पूर्वसमुद्रतटं च गत्वा रावणं तथैव कक्षावलम्बिनं कुर्वन् एव स्नानं संध्योपासनं च कृतवान् अन्ते च किष्किन्धापुरीं प्राप्तवान्। रावणम् उद्वहन् एव बाली उपवनम् आगतवान्। उपवने रावणं कुक्षितः मुक्त्वा वारं वारं प्रहसन् उवाच-त्वं कुतः आगतः? बालिनः पराक्रमं दृष्ट्वा विस्मितः रावणः वदति- हे वानरेन्द्र! अहं राक्षसेन्द्रः रावणः अस्मि। अहं युद्धेच्छया आगतवान्, युद्धं तु त्वया आसादितम्। युद्धम् अहं प्राप्तवान्। अहो! तव बलम्, अहो! तव गाम्भीर्यं, त्वया अहं पशुवत् गृहीत्वा चतुरः समुद्रान् भ्रामितः। त्वं तु वायुवेगेन, गरुडवेगेन, मनोवेगेन गतिमान् असि। हे कपिश्रेष्ठ! अहं तव बलं दृष्टवान्। अधुना अग्निं साक्षीकृत्य त्वया सह स्नेहपूर्णां चिरमैत्रीम् संपादयितुम् इच्छामि। ततः अग्निं प्रज्वाल्य तौ उभौ परस्परम् आलिङ्ग्य भ्रातृत्वम् उपसम्पन्नौ।

एवं रावणः बालिना सह मैत्रीं सम्पादितवान्। अतः एतद् निश्चितं यत् स्वापेक्षया निर्बलान् रावणः पीडितवान्, बलवत्तरैः सह मैत्रीं सम्पादितवान्। एषा एव रावणस्य नीतिः आसीत्। शिवस्य सामर्थ्यं ज्ञात्वा एव रावणः शिवभक्तः जातः।

**उपाध्यक्षः,**

**भारतीयसंस्कृतप्रचारसंस्थानम्, जयपुरम्।**

हार्दिक शुभकामनाओं सहित :-

निर्माता

**ए इन्फ्रास्ट्रक्चर लिमिटेड**

**एस्बेस्टोस सीमेन्ट पाइप्स**

सस्ता, मजबूत एवं टिकाऊ

सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ

एवं

निर्माता

**एस्बेस्टोस सीमेन्ट शीट्स**

**छत एक, लाभ अनेक**

उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें

कारखाना : हमीरगढ़ - 311025, जिला भीलवाड़ा (राजस्थान) दूरभाष: 01482-286102-07

दिल्ली कार्यालय : ए-९ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26961849/26965673

जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड, जयपुर-302001 फोन: 0141-4019691/2370566

ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

# रामगीताऽमृतम्

## ( अध्यात्मरामायणान्तर्गतम् )

❑ युगलकिशोरभारद्वाजः

कदाचिदेकान्त उपस्थितं रामं, भक्त्या प्रणम्य विनयान्वितो लक्ष्मणोऽब्रवीत्। हे भगवन्! शुद्धबोधोऽसि त्वम्, अहं प्रपन्नोऽस्मि। अहमज्ञानतमःप्रशान्तये सुखेन अज्ञानमपारवारिधिं तरणार्थं किञ्चिदुपायं ज्ञातुमिच्छामि। क्षितिपालभूषणो रामो प्राह-आदौ स्ववर्णाश्रम-व्यवस्थानुसारं शुद्धमानसः सन् शमदमादिसाधनमनुसृत्य आत्मबोधार्थं सद्गुरुमात्मलब्धये समाश्रयेत्। संसारेऽस्मि-न्निष्टानिष्टानां हेतुभूतानां धर्माधर्माणां विविधं क्रियाविधानं वर्णितम्। अत्र अज्ञानमेव हि मूलकारणं विद्यते। तन्नाशविधावत्र एक उपायः विद्यया ज्ञानेन एव संभवते, न तु कर्मसाधनैः। यतः सर्वाणि कर्माणि तु देहाभिमानात् अज्ञानकृतकर्मभिः संभवन्ति। अज्ञानोद्भवकर्मभिः कथमज्ञानहानिः संभवा। अतः सदोषमुद्भूतकर्मभिः संसृतिरप्यवारिता इति सिद्ध्यति। तस्माद् बुधो ज्ञानविचारवान् भवेत्। सर्वाः क्रियाः देहाभिमानादभिवर्धन्ते तथा विद्या तु गताऽहंकृतिनो जायते। विशुद्धविज्ञान-समर्जिता विद्या तु मुक्ताऽहंकारतः प्रवर्तते। अत्र विद्या तु अखिलकारकादिभिः सहवर्तिक्रियाभिर्जातभावनां समूलतः निहन्ति।

अतः सुधीजनैः अनित्यत्वादशेषतः कर्मभावना त्यक्तव्या विद्याविरोधित्वाद्। यावत् शरीरेन्द्रियादिषु आत्मभावना आत्मधीस्तावदेव कर्मभावना तिष्ठति। नेति-नेति इति अनात्मवस्तुनिषेधात् आत्मदृशा तां परमात्म-भावनामात्मन्यवधारयेत्, तस्याः प्रभावात् सकारका मायाऽञ्जसैवात्मनि प्रविलीयते, तदनन्तरं कदापि कर्ताऽहमिति मतिः न पुनः प्रसूयते इति सिद्धान्तो रामप्रभुणा प्रतिपादितः। अतः अत्र विद्या एव केवला विमोक्षाय विभाति इति। श्रुतिसम्मतं ज्ञानमत्र विमोक्षाय सिध्यति, न च कर्मसाधनाय। तत्त्वदर्शिभिः बुधैर्ज्ञानमाश्रित्य देहे अहमिति अनात्मबुद्धिः अत्र त्याज्या। ततः अज्ञानभावनात्मिका अविद्या सर्वथैव निवृत्ता भवति। तदा परमार्थतत्त्वात्मकमतीव निर्मलं ज्ञानं जागरितं भवति तदा अविद्या न पुनः जायते, इति मत्वा रामप्रसादात् **रामगीता** इति समुद्गीता। अस्मात् प्रसंगात् जीवात्मनोः ऐक्यभावं विज्ञाय सुमेरुसमनिश्चल- मतिमाधाय विज्ञजनाः सुखिनः भवेयुः। मिथ्यावृत्तीनां सर्वथाऽभावे जाते सति नित्ये परे ब्रह्मणि केवले शिवे सारभूतं सच्चिदानंदघनस्य प्रेमानन्दानुभूतिरूपम् अमृतं समास्वादितं भवति। यथा नारिकेलाम्बुपानानन्तरम् असारभागस्य प्रक्षेपणं भवति तथैव तमोमूलाऽखिल-क्रियाऽपि त्याज्या। कदाचिदात्मा न जायते न विवर्धते न क्षीयते एवं सुखात्मके ज्ञाने सति आत्मनि दुःखभावः कथमवशिष्यते।

अज्ञानतः भ्रमः भवति, असर्पभूते रज्जौ अहिभावना प्रतीयते, ज्ञाने सति विकल्पमायारहिते निरामये चिदात्मनि ब्रह्मणि सा अध्यासभूताऽहिभावना सर्वथैव प्रविलीयते तदा जडमात्रगोचरं जडत्वमशेषतः नाशं याति।

सद्गुरुप्रसादात् सञ्जातविद्यानुभवो निरामय आनंदमयो जीवात्मा शुद्धः अखण्डः सदैव मुक्तः अविक्रियात्मकः प्रारब्धमश्नन् विमलान्तराशिः भवति। सः सर्वभूतेषु परमात्मदर्शनभावनया विश्वमखिलम् आत्मवत् पश्यति। सदैवात्मानन्दानुभूतिपूर्वकं स्वानन्दतुष्टो जीवात्मा सकलप्रपंचं विस्मृत्य निस्तरंगसिन्धुः सदैव मुक्त-समस्तबंधनभावः परमात्मनि आत्मपरमात्मैक्यभावः भवति। एवम् अनेकजन्मार्जितजडचेतनग्रन्थयः तस्मात् सर्वसंशयाः निवर्तन्ते-भिद्यन्ते, इति रामगीता नामात्मकं श्रुतिसारसंग्रहभूतं रहस्यमेतत् परमात्मना रामेण लक्ष्मणाय प्रतिपादितं बुधैरवधारणीयम्।

**अतिरिक्तनिदेशकचरः ( आयुषः )**
**100, कृष्णानगरं, ब्रह्मपुरी मार्गः, जयपुरम्**
**दूरभाषः 9829410781**

# बीजमन्त्राणामर्थः महत्त्वञ्च

❑ डॉ. रजनीशकुमारबारहठः

यथा प्रत्येकस्य वृक्षस्य बीजे सूक्ष्मस्वरूपे तस्य वृक्षस्य स्वरूपम् अन्तर्निहितं भवति। तस्य बीजस्य वपने सिञ्चने च जाते एको विशालवृक्षो भवति तथैव सर्वस्मिन् बीजमन्त्रे तस्य देवविशेषस्य स्वरूपम् अन्तर्निहितं भवति। अतो मन्त्रः जपानुष्ठानसाधनाद्वारा तत्तद्-देवसाक्षात्कारं कारयितुं शक्नोति।

समुदेतीयं जिज्ञासा यत् किम् नाम एते मन्त्राः? किञ्च एतेषां स्वरूपम्? किञ्चैतेषामौचित्यं महत्त्वञ्च? प्रश्नानामेतेषां समाधाने किमपि स्पष्टवर्णनं तु न प्राप्यते यतो हि एष विषयः गोप्यः परिभाषागम्यो तन्त्रवर्णनीयश्च। अयम् अनुभवगम्यः साधनागम्यश्च वर्तते। तथापि उपलब्धतथ्यान् सामान्यनिष्कर्षान् शास्त्रपरम्पराञ्च विचार्य अस्मिन् विषये शोधरूपे संक्षिप्तं विवेचनं प्रस्तूयते।

वस्तुतः कोऽपि एतादृशमक्षरं न भवति यत् मन्त्रो न भवति, किमपि मूलमेतादृशं न भवति यत् औषधिर्न स्यात्, केवलं तस्य उचितज्ञानस्य आवश्यकता भवति–

**अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम्।**

एवमेव महाभाष्ये महर्षिपतञ्जलिनोक्तम्– 'एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः शास्त्रान्वितः स्वर्गे लोके कामधुग् भवति' (पा.सू. पृ. 1.83) अर्थात् एक एव शब्दः सम्यग्रूपेण ज्ञातोऽभिज्ञातो मन्त्रसाधनाप्रयुक्तो कामधेनुवत् साधकस्य सम्पूर्णमनःकामनाः पूरयति। एवमेव यदा कोऽपि साधुशब्द एव एतादृशः सशक्तो भवति तर्हि विधिवत्प्रयुक्तानां मन्त्राणां बीजमन्त्राणां महिमा तु अनिर्वचनीय एव। मन्त्रो बीजमन्त्रो वा साधारणशब्दो न भवति अपि तु दिव्यशक्तेः साधको वाचकश्च भवति।

एते मन्त्राः कस्यचित् देवविशेषस्य स्वरूपस्य बोधं कारयन्ति। एतेषु मन्त्रेषु बीजमन्त्रेषु च प्रामुख्येनायं भेदो भवति यत् बीजमन्त्राः मन्त्राणां संक्षेपणं भवति। एवं मन्त्राणामपेक्षया इतोऽपि सशक्ता ऊर्जस्विनश्च भवन्ति, प्रत्युत शब्दब्रह्म एव भवति। यथा **'ॐ'** इति बीजमन्त्रस्तस्य परमतत्त्वस्य परमात्मनो वाचको बोधको वा भवति। **'तस्य वाचकः प्रणवः'** –*योगसूत्रम्* १/२७। तथैव सर्वे बीजमन्त्राः परमशक्त्या कयाचित् देवशक्त्या वा सम्बद्धा भवन्ति।

एवमेव एते बीजमन्त्राः परमतत्त्वसहितेन सम्पूर्णब्रह्माण्डस्य प्रतिनिधित्वं कुर्वन्ति। तथापि यतो हि अर्थं विना जपस्य सम्पूर्णता न भवति **''मन्त्रार्थभावनं जपः''** –*मन्त्रयोगसंहिता*। अत एतेषां बीजमन्त्राणां कोऽर्थ इति जिज्ञासा पुनः समुदेति, अथ चैवमधीयते यत् एतेषां बीजमन्त्राणामर्थो ज्ञानातीतो वर्णनातीतो वा भवति। तर्हि अस्य समाधानं किं स्यात्? फलतोऽस्य समाधाने अस्माकं मनीषिभिः मन्त्राणां षड्विधा अर्थाः प्रतिपादिताः – (१) **वाच्यार्थः**, (२) **भावार्थः**, (३) **लौकिकार्थः**, (४) **सम्प्रदायार्थः**, (५) **रहस्यार्थः**, (६) **तत्त्वार्थः** इति। *योगसूत्रभाष्ये* (यो.सू. 1.27) च एतदेवोक्तं यत् **'सति तात्पर्ये सर्वे सर्वार्थवाचकाः'** अर्थात् मन्त्रस्य सर्वाण्यक्षराणि समस्तार्थानां वाचकानि भवन्ति, किन्तु यदा कस्मिंश्चित् एकस्मिन् समये एते

मन्त्राः केनचित् देवविशेषेण केनचित् शक्तिविशेषेण, सम्प्रदायानुष्ठानेन पुरश्चरणविशेषेण वा सम्बद्धा भवन्ति, तदा कस्यापि निश्चितार्थस्य वाचका बोधका वा भवन्ति तत्रापि च तेषां षडर्थेषु केचिदेवार्थाः अस्माभिः अवबुध्यन्ते, अधिगम्यन्ते, अनुभूयन्ते च। एवमेव बीजमन्त्राणां पूर्णस्वरूपज्ञानं तु वर्णनातीतमेवास्ति।

वाच्यार्थं विहाय अवशिष्टसर्वार्थानामवाप्तिं साधकः साधनया गुरुकृपया देवकृपया वोन्नयनेन क्रमश उत्तरोत्तररूपेण लभते। बीजमन्त्राणामर्थसन्दर्भे मन्त्र-शब्दस्य धातुगतार्थो भवति- 'गुप्तपरिभाषणम्'। यथा बीजगणितशास्त्रे बीजाङ्कानाम् आधारेण विविधराशीनां मानं सम्पाद्य विभिन्नगणनां समाधानं च क्रियते। एते बीजाङ्काः विभिन्नसंख्यानां वाचका भवन्ति। एवञ्चैते बीजमन्त्रा अपि देवतासम्प्रदायप्रयोगाधारेण निश्चितं वाच्यार्थं प्रतिपादयन्ति।

परञ्चोल्लेखनीयमस्ति यत् बीजमन्त्रो निश्चितमेकं अर्थं प्रतिपादयन्नपि केवलं तन्मात्रार्थे एव सीमितो न भवति प्रत्युत देवतासम्प्रदायप्रयोगपरिवर्तनेन तस्मिन्नर्थवैविध्यमागच्छति। यथा 'योग' शब्दः गणिते 'राशीनां योगार्थे' भवति, गीतायां 'कर्मसु कुशलता' भवति, योगदर्शने च 'चित्तवृत्तिनिरोधो' भवति, ज्योतिषे तु 'पञ्चाङ्गस्य एकभागः' इति अर्थो भवति। एवमेव बीजमन्त्रा अपि विविधदेवताभिः सह विभिन्न-सम्प्रदायानुष्ठानपुरश्चरणेषु प्रयुक्तेषु सत्सु विभिन्नार्थानां वाचका भवन्ति। तथापि मन्त्राणां बीजानां बहुसम्मतः परम्परागतो वाच्यार्थो भवति यस्मिन् विषये आगमग्रन्थेषु वर्णनमुपलभ्यते। केषाञ्चन **प्रमुखबीजमन्त्राणां परम्परागतः प्रचलितवाच्यार्थः** प्रस्तूयतेऽत्र -

**ॐ** = एष मन्त्रः परमात्मनः सूचकः वाचकः वा अस्ति। अस्मिन् मन्त्रे 'अ', 'ऊ', 'म्' एते वर्णाः सम्पूर्णब्रह्माण्डस्य प्रतिनिधित्वं कुर्वन्ति। महर्षिः पतञ्जलिरपि एतं ब्रह्मवाचिनं कथयति 'तस्य वाचकः प्रणवः।' गीतायामपि 'ॐ' अक्षरब्रह्मरूपे प्रतिपादितम् अस्ति- प्रणवः सर्ववेदेषु शब्दः खं पौरुषं नृषु(७.८)। उपनिषत्सु अपि एतस्य महत्त्वस्य निरूपणं बहुत्र वर्णितमस्ति।

**ऐं** = एतद् वाग्भवबीजं सरस्वतीबीजं वा भवति। अत्र ऐकारः सरस्वत्याः वाण्याः वा वाचको भवति, नादः जगन्मातुः बिन्दुः दुःखहरणस्य प्रतीको भवति। इत्थं ऐं इति बीजस्य अर्थो भवति- जगन्माता सरस्वती अस्माकं दुःखान् दूरीकुर्यात्। एवमेव *देव्यथर्वशीर्षेऽपि* स्वीकृतम्, तत्रापि ऐङ्कारः वाक्स्वरूपे स्वीकृतम्। सिद्धकुञ्जिकास्तोत्रे ऐङ्कारी सृष्टिरूपायै इति वर्णितमस्ति।

**ह्रीं** = एतद् मायाबीजमस्ति। अत्र ह= शिवः, र्= प्रकृतिः, नादः= विश्वमाता, बिन्दुः= दुःखहरणम्। इत्थं 'ह्रीं' इति बीजस्यार्थो भवति शिवयुक्ताऽऽद्या जननी अस्माकं दुःखान् दूरीकुर्यात्। अयमेव बीजमन्त्रो देवीप्रणवस्वरूपे स्वीकृतम्। श्रीदेव्यथर्वशीर्षेऽस्मिन् विषये उक्तम्-

**वियदीकारसंयुक्तं वीतिहोत्रसमन्वितम्।**
**अर्धेन्दुलसितं देव्या बीजं सर्वार्थसाधकम्।।**
**एवमेकाक्षरं ब्रह्म यतयः शुद्धचेतसः।**
**ध्यायन्ति परमानन्दमया ज्ञानाम्बुराशयः।।**
**( देव्यथर्वशीर्षम् १८,१९ )**

अर्थात् वियत्= आकाशम् (ह) ईकारयुक्तः, वीतिहोत्रं=अग्निः (र) सहितम्, अर्धचन्द्रः ( ँ ) इत्येतैरलङ्कृतम् यत् देव्याः बीजम् अस्ति, तत् सर्वान् मनोरथान् पूरयति। एवंविधम् अस्यैकाक्षरशब्दब्रह्मणो ज्ञानाम्बुराशयः मुनयः ध्यानं कुर्वन्ति।

**सिद्धकुञ्जिकास्तोत्रे** 'ह्रीं' इति बीजमन्त्रः जगत्पालिकास्वरूपे स्वीकृतोऽस्ति- ''ह्रीङ्कारी प्रतिपालिका।'' यदि वयं वैज्ञानिकरूपेण विश्लेषणं कुर्मः तर्हि प्राप्यते यत् **ह्रीं** इति बीजमन्त्रे कण्ठ-तालु-मूर्धा-नासिका-इति चतुर्णाम् उच्चारणस्थानानां प्रयोगो भवति।

**क्लीं** = एतद् कामबीजमस्ति, कृष्णबीजं कालिकाबीजं वा। अत्र क् = योगान्तः श्रीकृष्णः ल्= दिव्यतेजः, ई = योगेश्वरी योगेश्वरः वा, बिन्दुः = दुःखहरणम्। एवं प्रकारेण अस्य बीजस्य अर्थो भवति-योगेश्वरी अस्माकं दुःखान् दूरीकुर्यात् अथवा योगेश्वरः श्रीकृष्णः अस्माकं दुःखान् दूरीकुर्यात्। एतद् बीजं योगेश्वरस्य विष्णोः महामायायाः महालक्ष्म्याः वा प्रतीकरूपं वर्तते।

इत्थम् ॐकारयुक्ता एते बीजमन्त्रा (ऐं, ह्रीं, क्लीं) महासरस्वत्याः, महालक्ष्म्याः महाकाल्याश्च प्रतिनिधित्वं कुर्वन्ति। चेद्वयमेतेषां बीजमन्त्राणां वैज्ञानिकविश्लेषणं कुर्मः तर्हि प्राप्यते-

**ॐ = अ, ऊ, म्**
**ऐं = अ+ई=ऐ+म्**
**ह्रीं = ह्+र्+ई+म्**
**क्लीं = क्+ल्+ई+म्**

मन्त्रेष्वेतेषु उच्चारितानां वर्णानामुच्चारण-स्थानाधारेण भाषाशास्त्रीयविवेचनम् एवमस्ति-

| स्थानम् | | वर्णाः |
|---|---|---|
| कण्ठः | = | अ, ह क् |
| तालु | = | ई |
| मूर्धा | = | र् |
| दन्ताः | = | ल् |
| ओष्ठौ | = | म् |
| नासिका | = | म् |

इत्थमेतेषु बीजमन्त्रेषु सर्वेषामुच्चारणावयवानां प्रयोगो दृश्यते। एतेषाञ्चोच्चारणेन विशिष्टध्वनिप्रभावः प्रभूयते। एवमेव 'चामुण्डायै विच्चे' इति मन्त्रेऽपि सर्वेषाम् उच्चारणस्थानानां प्रयोगः विशिष्टध्वनिप्रभावश्च वर्तते।

**शाक्तमतस्य मूलबीजमन्त्रः - ''ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे''**

अयं मन्त्रो शक्तेरुपासनायाः मुख्यमन्त्रोऽस्ति। एतस्मिन् मन्त्रे अनेकानि बीजानि सन्ति येषु ऐं, ह्रीं, क्लीं इति बीजानाम् अध्ययनं विश्लेषणं च कृतमेव। इत्थम् एतस्य महामन्त्रस्य आशयः भवति परब्रह्मस्वरूपा महासरस्वतीस्वरूपा, महालक्ष्मीस्वरूपा, महाकाली-स्वरूपा चण्डमुण्डदैत्यविनाशिनी या देवी अस्ति तस्यै नमः इति।

सिद्धकुञ्जिकास्तोत्रेऽपि अयमेव आशयो वर्तते-

**ऐङ्कारी सृष्टिरूपायै ह्रीङ्कारी प्रतिपालिका।**
**क्लींकारी कामरूपिण्यै बीजरूपे नमोऽस्तु ते।।**
**चामुण्डा चण्डघाती च यैकारी वरदायिनी।**
**विच्चे चाभयदा नित्यं नमस्ते मन्त्ररूपिणी।।**

**देव्यथर्वशीर्षे** एतन्महामन्त्रस्य विवेचनमेव-मस्ति-

**वाङ्माया ब्रह्मसूस्तस्मात् षष्ठं वक्त्रसमन्वितम्।**
**सूर्योऽवामश्रोत्रबिन्दुसंयुक्तष्टात्तृतीयकः।**
**नारायणेन सम्मिश्रो वायुश्चाधरयुक् ततः**
**विच्चे नवार्णकोऽर्णः स्यान्महदानन्ददायकः।।**

अर्थात् वाणी = ऐं, माया = ह्रीं, ब्रह्मसूः (कामः) = क्लीं, ततः षष्ठं व्यञ्जनम् = च, तदपि वक्त्रयुक्त आकारयुक्तो वा = चा, सूर्यः = म्, अवामश्रोत्रः = उ, बिन्दुसंयुक्तः = '˙ ' तात् तृतीयकः = ड, नारायणेन

सम्मिश्रः = डा, वायुः = य, तदपि अधरयुक् = यै विच्चे। अयं नवार्णमन्त्र उपासकानां कृते आनन्ददः ब्रह्मसायुज्यदाता च वर्तते।

एवमेव अयं महामन्त्रः सम्पूर्णसप्तशत्याः साररूपः अस्ति। विविधस्वरूपायाः तस्याः आद्याशक्तेः वाचको बोधको वा वर्तते। अयमेव मन्त्रः तस्याः भगवत्या साधनायां प्रारम्भादासाक्षात्कारं सोपानभूतं वर्तते।

**अन्ये बीजमन्त्राः**

**श्रीं** = श्रीबीजं महालक्ष्मीबीजं वा। श् = महालक्ष्मीः, र् = धनसम्पत्तिः प्रकृतिर्वा, ई = जगन्माता, बिन्दुः = दुःखहरणम्। अर्थात् धनसम्पत्त्याः अधिष्ठात्री जगज्जननी महालक्ष्मी अस्माकं दुःखान् दूरीकुर्यात्।

**क्रीं** = कालबीजं कर्पूरबीजं वा। क् = काली, र् = प्रकृतिः, ई = महामाया, नादः = विश्वमाता, बिन्दुः = दुःखहरणम्। अर्थात् जगन्माता महाकाली अस्माकं दुःखान् दूरीकुर्यात्।

**दुं** = दुर्गाबीजम्। द् = दुर्गतिनाशिनी दुर्गा उ = सुरक्षा, बिन्दुः = दुःखहरणम्। अर्थात् भगवती दुर्गा अस्माकं दुःखान् दूरीकुर्यात्।

**स्त्रीं** = वधूबीजं ताराबीजं वा। स् = दुर्गा, त् = तारा, र् = प्रकृतिः, ई = महामाया, नादः = विश्वमाता, बिन्दुः = दुःखहरणम्।

**हौं** = प्रसादबीजं शिवबीजं वा। ह = शिवः ऊ = भैरवः, बिन्दुः = दुःखहरणम्।

**हूँ** = वर्मबीजं कूर्चबीजं वा। ह् = शिवः ऊ = भैरवः, बिन्दुः = दुःखहरणम्।

**हं** = हनुमद्बीजम्। ह = हनुमान् अं-संकटमोचनम् दुःखहरणं वा।

**गं** = गणेशबीजम्। ग् = गणेशः, अ = विघ्ननाशकः।

**सिद्धकुञ्जिकास्तोत्रानुसारेण बीजमन्त्राणि**

**ऐं** = सृष्टिस्वरूपिणी, ब्रह्माणी, सृष्टिकर्त्री वा।

**ह्रीं** = सृष्टिपालिका, वैष्णवी, सृष्टिभर्त्री वा।

**क्लीं**= कामरूपिणी, पुनः बीजहेतुस्वरूपा।

**चामुण्डायै** = चामुण्डा=चण्डमुण्डविनाशिनी, यै = वरदात्री।

**विच्चै**= नित्या अभयदात्री।

**धां धीं धूं**= धूर्जटी शिवा।

**वां वीं वूं**= वागीश्वरी।

**क्रां क्रीं क्रूं**= कालिकास्वरूपिणी।

**शां शीं शूं**=शान्तिकारिणी, कल्याणकारिणी।

**हुं हुं**= हुङ्कारस्वरूपिणी।

**जं जं जं**= जम्भनादिनी।

**भ्रां भ्रीं भ्रूं** = भैरवरूपिणी भद्रा।

**पां,पीं, पूं** - पार्वतीस्वरूपिणी पूर्णा।

**खां खीं खूं**= खेचरी

**सां सीं सूं**= सप्तशतीस्वरूपिणी देवी।

एवमेव विविधबीजमन्त्राणां तन्त्रागमशास्त्रा-नुसारमर्थोऽनुसन्धेयः। बीजमन्त्राणां शब्दार्थज्ञाने सति क्षिप्रं चमत्काराः साधनायां सम्भवन्ति इति न संशयावसरः।

**सहायक आचार्यः ( संस्कृते )**
**राजकीय-कन्या-महाविद्यालयः,**
**तारानगरम्, ( चूरू ) राजस्थानम्**

# संस्कृतसाहित्ये सामाजिकं चिन्तनम्

❑ जया शर्मा

संस्कृतसाहित्यस्य परम्परा अत्यन्तप्रचीना, विशाला, विविधतापूर्णा च संस्कृतं मात्रमेका भाषा नापितु आध्यात्मिकस्य चिन्तनस्य दर्शनस्य ज्ञानविज्ञानस्य साहित्यस्य च आगारस्वरूपा। सम्पूर्णं विश्वमेकतायाः सूत्रे बध्नातीयम्। हिन्दुजैनबौद्धादीनां धर्माणां प्राचीनाः ग्रन्थाः अपि संस्कृतभाषायामेवोल्लिखिताः। एषा तु संस्काराणां भाषा। यद्यपि आधुनिकतायाः दृष्ट्या भौतिकाडम्बरवत इयं भाषा मृतप्राया प्रतीयते। किन्तु इमाम् मृतप्रायां कृत्वा अस्माभिः स्वपारिवारिकानां सामाजिकानाञ्च संस्काराणां ह्रासः कृतः। वयम् वैदेशिकानाम् भाषाणां पठने तेषां संस्कृत्याः अनुकरणे स्वस्य गौरवमनुभवामः किन्तु स्वस्य मौलिकभाषायाः पठने स्वसंस्कृत्यनुकरणे हीनतामनुभवामः। संस्काराणां रक्षणस्यैकमेव सूत्रं वर्तते संस्कृताध्ययनम्। अत्र निहिताः श्लोकाः सुभाषितानि च मनुष्यान् जीवननिर्वाहस्य पथः प्रदर्शयन्ति। भारतीयाः संस्कृतिः सर्वदैव विभाजनस्य स्थाने एकीकरणस्य सम्पोषिका। वैदिकाः लौकिकाश्च ग्रंथाः अस्माकम् पारम्परिकविचारान् प्रदर्शयन्ति। ऋग्वेदे निहितम्-

**संगच्छध्वम् संवदध्वं सं वो मनांसि जानताम्।**
**देवा भागं यथापूर्वे सं जानाना उपासते।।**[1]

अयम् मंत्रः अस्मान् मिलित्वा चलनाय गमनाय भाषणाय च प्रेरयति। संघभावेन मतैक्यतां धारणाय निर्दिशति। महोपनिषदि वर्णितम्-

**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्।।**[2]

अस्माकम् सनातनधर्मस्य मूलसंस्काररूपेण वर्णिता वसुधैव कुटुम्बकमिति भावना। एषा विचारधारा स्वस्य परस्य च भेदम् दूरीकृत्य उदारतायाः सम्पोषिका। अयं श्लोकः सम्पूर्णं विश्वमेव कुटुम्बरूपे मननाय संदिशति। भारतीयसंसदः सदनस्य प्रवेशद्वारे अस्योल्लेखः अस्य महत्तां प्रदर्शयति।

समाजस्याधारः परिवारः वर्तते। प्रत्येकं परिवारः संस्कारवान् भवेत् तर्हि समाजः स्वयमेव संस्कृतो भविष्यति। पारिवारिकाणां संस्काराणां शिक्षा रामायणं तैत्तिरीयोपनिषदञ्च विहाय केन दातुं शक्यते? रामायणस्य चरित्राणां हृदयस्पर्शि वर्णनम् मनुष्याणां हृदये सदाचारस्य त्यागस्य प्रेम्णः सेवायाः पितृभक्तेश्च भावानुत्पादयति।

**तैत्तिरीयोपनिषदि वर्णितं ''मातृदेवो भव। पितृ देवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यानि अनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि। यानि अस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि। श्रद्धया देयम्। अश्रद्धया देयम्। सत्यं वद। धर्मं चर।''**[3]

उक्तनिर्देशाः श्रेष्ठसमाजस्य स्थापनायाः आधाराः। परिवारे स्नेहपूर्णं सम्मानपूर्णञ्च वातावरण-मत्यावश्यकम्। निरर्थकः कलहः विभाजनस्यैव कारकः। पतिपत्न्योः सम्बन्धविच्छेदोऽपि अधुना सामान्यमेव वर्तते। विवाहितानां स्त्रीपुरुषाणां कृते आपस्तम्बधर्मसूत्रे वर्णितं जायापत्योर्न विभागो जायते अर्थात् मृत्युं विहाय जायापत्योः विभाजनस्य किमप्यन्यत् कारणं न भवेत्। यथा भार्या भर्तारं विनाऽपूर्णा तथैव भर्ता आत्मनः अर्धांशं भार्यां विनाऽपूर्णः। यावत् सः भार्यावान् प्रजावान् न जायते तावत् अपूर्णः।

**अर्धो हि वा एष आत्मनस्तस्माद्यज्जायां न विन्दति।**
**नैतावत् प्रजायते असर्वो हि तावद् भवति।।**[4]

1 ऋग्वेदः, संज्ञानसूक्तम्, 10/9/2
2. महोपनिषद्, अध्याय-4 श्लो. 71
3. तैतरीयोपनिषद्, शिक्षावल्ली, पृ. 353 4. वाजसनेय ब्राह्मणम् (साहित्यिकसुभा-षितवैद्यकम् पृ. 141)

परस्परम् ईर्ष्या घृणायाः भावः दुःख-कारकः एव। हितोपदेशेऽपि कथितमस्ति यत्-

**ईर्ष्यी घृणी त्वसन्तुष्टः क्रोधिनो नित्यशंकितः।**
**परभाग्योपजीवी च षडेते दुःखभागिनः।।**[5]

ईर्ष्यावान्, घृणावान्, सर्वदाऽसन्तुष्टः, सर्वदा-क्रोधयुक्तः, नित्यशंकावान्, पराधीनश्च जनः सदैव दुःखी जायते। ते अन्येषामपि उत्कर्षन्न सहन्ते। ते अन्यस्य गुणानपि न पश्यन्ति, तेषां कृते गुणाः अपि सर्वथा त्याज्याः दुर्गुणाः एव। सर्वत्रैव स्वस्य प्राधान्यं स्थापनाय स्वस्य दोषानपि गुणानिव मण्डयन्ति। उक्तम्-

**न दुर्जनानामिह कोऽपि दोषस्-**
**तेषां स्वभावो हि गुणासहिष्णुता।**
**द्वेष्यैव केषामपि चन्द्रखण्ड-**
**विपाण्डुरापुण्ड्रकशर्कराऽपि।।**[6]

लोकनिन्दितेषु वर्जनीयेषु कर्मसु नियोजितः जनः किञ्चित् कालं यावदैश्वर्यं भुक्त्वा पश्चात् स्वकर्मणां फलमवश्यमेव भुङ्क्ते यथा दूषितमूलयुक्तः वृक्षः किञ्चित्कालपर्यन्तं प्रफुल्लितो भूत्वा अनन्तरं जीर्णतामुपयाति। वाल्मीकिना निर्दिष्टम्-

**न चिरं पापकर्माणः क्रूरा लोकजुगुप्सिताः।**
**ऐश्वर्यं प्राप्य तिष्ठन्ति शीर्णमूला इव द्रुमाः।।**[7]

अखिला मनुष्यताधुना स्वकृतपापैः व्यसनैश्च व्याकुला प्रतीयते। दुर्व्यसनानां प्रभावः न केवलं स्वस्योपरि अपितु अन्यस्योपर्यपि भवति। विभिन्नाः रोगाः अपि तेषामेव फलम्। मद्यपानं तेषु व्यसनेषु एकम् येन मतिभ्रष्टः पथभ्रष्टः चरित्रभ्रष्टो धैर्यरहितश्च भूत्वा लज्जाञ्च त्यक्त्वा जनः पापचारी जायते। कथितम्-

**एकतः सर्वपापानि मद्यपानं तथैकतः।**[8]

यथा जले तरणिम् वायुः हरति तथैव विषयाः देहिनोऽनायासेनैव हरन्ति। निराहारः एव विषयाणां निवर्तनस्योपायः। विषयाणां सततं ध्यानेन सङ्गोपजायते सङ्गात् सञ्जायते कामः कामात् क्रोधोपजायते। क्रोधेनोन्मादितो भूत्वा जनः हननमात्महननं परस्योत्पीडनं सदृशञ्च विनाशं सम्पादयति। संस्कृतसाहित्यस्य धार्मिकनैतिकाध्यात्मिकाश्च ग्रंथाः धैर्यस्य संयमस्य चोपदेशान्दत्त्वा मानवतायाः पथप्रदर्शनं कुर्वन्ति। येन समाजे सामञ्जस्यस्य सहिष्णुतायाश्च भावाः प्रादुर्भवन्ति। योग्यतायाः कृते अवसराः एधिष्यन्ते।

तनावग्रस्तेऽस्मिन् संसारे योगस्योपादेयता सम्पूर्णेन विश्वेन स्वीकृता।

योगेन न केवलं शरीरमपितु मनोऽपि स्वास्थ्यमाप्नोति। व्यवस्थितदिनचर्यायाः माध्यमेनैवार्ध-रोगाः नश्यन्ति। काले शयनं, काले जागरणं विसंगतीनां नाशकम्। **अर्धरोगहरी निद्रा**[9]

निद्रा प्राणिनाम् शरीरधारणे प्रथमा हेतुः। सा रोगप्रतिरोधकक्षमतायाः अपि वर्धिका। यः स्वहित-मिच्छति तेन रात्रौ जागरणं दिवा शयनमालस्यम् परनिन्दाऽतियोगश्च कदापि न करणीयम्। महाभारते वर्णितम्-

**नक्तं चर्या दिवास्वप्नमालस्यं पैशुनं मदम्।**
**अतियोगमयोगं च श्रेयसोऽर्थी परित्यजेत्।।**[10]

अनेन प्रकारेण अस्माकं संस्कृतसाहित्यम् सर्वावस्थासूपकारकम्। लोकव्यवहारस्य धर्मस्या-ध्यात्मनश्च संयमस्य कर्तव्याकर्तव्यस्य च यादृशं वर्णनमत्र तादृशं कुत्रापि न विद्यते।

यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचिद्।

**शोधच्छात्रा**
**संस्कृतविभागः, राजस्थानविश्वविद्यालयः, जयपुरम्**

5. हितोपदेशः, श्लो. 25 पृ. 57 6. विक्रमांकदेवचरितम्, 1.20
7. श्रीमद्वाल्मीकिरामायणे, अरण्यकाण्डे, 29.7
8. महासुभाषितसंग्रहे, श्लोक सं. 7472
9. वैद्यकीयसुभाषितसाहित्यम् पृ. 175
10. महाभारतेशान्तिपर्व, 287/24

# विनायक-सहस्रबुद्धे

क्रमशः

❑ पण्डित राजेन्द्रमोहन शर्मा

इदं प्रथमं मन्दिरमासीत् यत्र शिवः एकाकी उपाविशत्! स किञ्चित् समयानन्तरमेव ध्यान-मग्नोऽजायत। ज्योत्स्नायां स्नातो विनायकः स्वर्ण-पिण्डमिवालोकितोऽभवत्। स निशायाः प्रथमप्रहरो व्यतीत इत्यपि नाजानात्। सम्पूर्णां रात्रिं यावत् साधनाया शान्तां नीरवां यात्रां पूरयित्वा यदा स बहिरागच्छत् तदा पूर्णरूपेण सूर्यः प्राकाशिष्ट। प्रासादस्य पूर्वद्वार-मुद्घाटितमविद्यत। परन्तु स अचिन्तयत् मामपूर्वदृष्टं (अजनवी) जनं मत्वा कोऽपि अवरोधयेत् इति अथवा मदीयं परिचयं पृच्छेत्-नाग्रे गन्तुमाज्ञां प्रयच्छेत्। अतः स आकृतिपरिवर्तनमकरोत्। एको वृद्धः कार्मणज्ञः संजातः। इतस्ततः पतितानि वस्तूनि उत्त्थाप्य प्रसेवे (झोली) संस्थाप्य शिरसि शिरस्त्राणं संयोज्य विनम्य स द्वारदेशादन्तः प्राविशत्।

अन्तः प्रविश्य विनायकोऽपश्यत्-परितः भव्य-भवनानि निर्मितान्यासन्। मन्ये विशालमेकं नगरमेव निर्मितमविद्यत। विस्तृता उभयतः प्रसृता विशाला राजमार्गाः विद्यन्ते। मुख्यमार्गमुभयतः सफलाः विशालवृक्षाः प्रकाशाय सुन्दरस्तम्भाः तेषु लम्बितानि दीपदानानि सुन्दरकलाभिः संश्रुतानि कोणानि इत्थं प्रतीयन्ते स्म यत् भवनानि परस्परं स्पर्धां कुर्वन्ति। मुख्ये वणिक्पथे आपणानि बहुमूल्यवस्तुभ्यः परिपूर्णानि अविद्यन्त। स्वर्णाभूषणानि मणिमाणिक्यैः पूरितासु आपणिकासु नगरस्य सुन्दरस्त्रियः स्वनासाकर्ण-कण्ठकरेषु आभूषणानि धारयित्वा परीक्षणं कुर्वन्तिस्म। परन्तु विनायकस्य एषु नास्ति काप्यभिरुचिः। सः शनै शनैः प्रासादभागमगमत्। प्रासादस्य बहिर्भागे प्रहरिणः आसन्। प्रहरिणां वेशभूषया शस्त्रास्त्रैश्च विनायकोऽ-जानात् यत् प्रासादे प्रवेशो न सरलः।

विनायकः प्रासादस्य मुख्यद्वारसम्मुखे स्वकीयां स्यूतं (झोली) मार्गमध्ये अस्थापयत्- शनैः शनैः डमरू-मवादयत्। विनायकस्य डमरूवादनं मधुरस्वरेण गायनं श्रुत्वा शनैः शनैः पथिकाः शिवश्च तत्र एकत्रिताः संजाताः। विनायको हसित्वा जनान् समबोधयत्, कार्मिककर्माणि चादर्शयत्। जनानमोहयत्, द्वारस्थिताः प्रहरिणोऽपि वृद्धस्य कार्मिकस्य कर्मणा आश्चर्यचकिताः संजाताः। तस्मिन्नेवान्तराले एकः प्रहरी निकटे आगत्यावदत् साधो (बाबा)! किञ्चित् कालं यावदस्माभिः सहाभ्यन्तरे चलित्वा प्रासादस्य राजकुमारीणां प्रसन्नतायै अपि स्वक्रीडां दर्शयतु।

विनायको मनसि अचिन्तयत् यत् अनायासेनैव मदीयं वाञ्छितं मयाधिगतम्। प्रासादे प्रवेशायामन्त्रयन्ति माम्। विनायकः स्वकीयं महत्त्वं प्रदर्शयन् अवदत्। नैव, मम समीपे समयो नास्ति। योऽस्माकं क्रीडां दिदृक्षति स बहिरागच्छेत्। प्रहरी अन्यान् प्रहरीगणानाह्वयत्, सर्वे मिलित्वात्यन्तमाग्रहं चक्रुः। विनीता न्यवेदयन्। विनायकः सप्रतिज्ञं गन्तुं तत्परो जातः। स अवदत् अहं क्रीडां तदैव प्रदर्शयिष्यामि यदा पूर्णेनानन्देन सह माम् सम्पूर्णं भवनं भवन्तो दर्शयिष्यन्ति। प्रमुखप्रहरिणे नासीदिदं कठिनं कार्यम्। स स्वीकृतिं प्रायच्छत् विनायकश्चैकेन प्रहरिणा सह राजप्रासादे प्राविशत्। प्रहरी क्रमशः सम्पूर्णं भागं प्रादर्शयत्। अन्ते प्रहरी महाराजस्य मुख्यं प्रासादं प्रादर्शयत्। राजप्रासादे सिंहासनं परितो रत्नानि मणयः अन्यानि बहुमूल्यवस्तूनि न्यस्तान्यविद्यन्त। महाराजस्योपवेशनाय सर्वेभ्यः उपरि समुन्नते भागे भव्य-मासनमविद्यत। प्रहरी अकथयत् सिंहासनस्य वामभागे राजकुलस्य प्रमुखाः स्त्रियः, याभ्यः प्रमुखकार्याणां दायित्वं प्रदत्तं विद्यते, ताः उपविशन्ति। दक्षिणभागो

राजप्रमुखानां कृते निर्धारितो विद्यते। ततः अन्येषु आसनेषु क्रमशः धर्मशिक्षान्यायार्थचिकित्सा-प्रमुखा उपविशन्ति। विनायको राज्यव्यवस्थायाः सुव्यस्थितं स्वरूपं दृष्ट्वात्यन्तमतुष्यत्। ततः प्रासाद-स्यान्यभागान् दृष्ट्वा भवनस्य केन्द्रे समागत्योदतिष्ठत्।

प्रहरिण आग्रहेण विनायको भवनस्य स्त्रीभ्यः कुमारीभ्यः कन्यकाभ्यः सेवकेभ्यः स्वकार्मणं (जादू) प्रादर्शयत्। डमरूशब्दः विनायकस्य कण्ठस्वरश्च प्रासादस्थान् सर्वान् असूचयत्। किञ्चित् क्षणानन्तरमेव राजप्रासादस्य सुन्दरस्त्रियः कुमारिकाः लघुबालकाः सेवकाश्चागच्छन्। विनायकस्याकर्षकक्रीडां दृष्ट्वा सर्वे मन्त्रमुग्धा अजायन्त। हस्तकौशलेन क्रीडाकार्येभ्यश्च सर्वे मन्त्रमुग्धाः संजाताः। यदा विनायकस्य क्रीडा पूर्णा जाता स च स्वकीयां सामग्रीं स्वझोलीमध्ये स्थापयितुं तत्परः संजातः। तस्मिन्नेव समये एका कुमारी समागत्य विनायकमवदत् शृणोतु क्रीडक! वयं तु तव क्रीडाज्ञानं तदा स्वीकरिष्यामो यदा भवान् गगने सोपानानि रचयित्वा कमपि तत्र समारुह्य इन्द्रलोके भ्रामयेत्। विनायको हसन्नवदत् तथास्तु। स रज्जूनिर्मितमेकं सोपानं वायावुदप्लावयत्, तच्च सर्वेषां सम्मुखे गगनमस्पृशत्, शनैः तस्य शिरोभागो नेत्राभ्यामदृश्यः संजातः। विनायकस्तामेव कुमारीमाह्वयत्, अकथयच्च आगच्छतु प्रथमं भवतीमेवेन्द्रलोकं भ्रामयामः।

# प्रियं भारतम्

❑ पं. रमेशचन्द्र शर्मा

**नमस्तेस्तु गीते सुगीते शरण्ये,**
**पुनीते प्रिये कृष्णदामोदरस्य।**
**ब्रजेशं प्रियं भारतस्य प्रपूज्यम्,**
**रहस्यं च लीलाधरं तं भजेऽहम्।। 113।।**
**भजेऽहं प्रियं कृष्णचन्द्रं सुरेशम्,**
**यशोदासुतं नन्दनं नन्दबालम्।**
**हरिं लोकपालं प्रियं वासुदेवम्,**
**कृपालुं च नर्तावतंसं नमामि।। 114।।**
**हरेशं हरीशं प्रमेशं प्रजेशम्,**
**शुभं कामदेवं महाकालरूपम्।**
**प्रियं गोपनाथं मुरारिं परेशम्,**
**विशालाक्षमाद्यं च कृष्णं भजेऽहम्।। 115।।**
**सुभक्त प्रियं चादिदेवं सदैव,**
**उदारं च गोविन्द देवं नतोऽहम्।**
**तथा तारकारिं सदाविश्ववन्द्यम्,**
**भजेऽहं प्रभुं लोकदेवाधिदेवम्।। 116।।**
**प्रसन्नं विभुं राजराजाधिराजम्,**
**रसानन्ददं सर्वसौख्यप्रदं च।**
**रसाधीश्वरं गोपरक्षापरं हि,**
**प्रियं द्वारिकेशं शुभाङ्गं नमामि।। 117।।**
**सुधीरं सुशान्तं सुधान्यं सुमान्यम्,**
**गुरुं ज्ञानिनामग्रण्यं सुवेशम्।**
**मुकुन्दं प्रियं माधवं गोपबालम्,**
**भजेऽहं सदा केशवं कृष्णरूपम्।। 118।।**
**जगन्मोहनं चंचलाक्षं च दिव्यम्,**
**सुरैः सेव्यमानं विलोलं विशालम्।**
**प्रफुल्लारविन्दं च गोपालरूपम्,**
**प्रियं श्यामदेवं सदाऽहं भजामि।। 119।।**
**प्रभुं विक्रमं श्यामरूपं सदाऽहम्,**
**नतोऽहं नरेशं नवं खाटुश्यामम्।**
**जगद्बीजरूपं जगत्पालकं च,**
**भजामि स्मारामि प्रजापालनाथम्।। 120।।**
**अनन्तं च नित्यं पुराणं हि श्रेष्ठम्,**
**पुनश्चक्रपाणिं च राधाप्रियं तम्।**
**अपारं परं कोमलं लोकनाथम्,**
**दयासागरं गोपनाथं नतोऽहम्।। 121।।**

**व्याख्याता, 8952008363**

# विभक्तौ लिङ्गविशिष्टाग्रहणम्

❑ डॉ. जगदीशप्रसाद जाटः

नन्वेवं 'यूनः पश्ये' त्यत्रेव 'युवतीः पश्ये' त्यत्रापि श्वयुवेति सम्प्रसारणं स्यादिति परिभाषेन्दुशेखरस्य अवतरणम्। अत्र **सर्वमङ्गलाव्याख्यायां** युवतीः पश्येत्यस्य सुपथीत्यादौ आत्वादेरुपलक्षणत्वं स्वीकृतम्। तत्र प्रमाणञ्च भाष्यस्य प्रादायि। तथा चोक्तम्-युवतीरित्यत्र तु अन्नन्तानां श्वादीनामित्यर्थकरणेन सम्प्रसारण-व्यावृत्तेर्भाष्यकृतोक्तत्वादिति। अतः परं तेनैव सर्वमङ्गलायां 'केचित्तु' अङ्गावयवासर्वनामस्थानेति मूलोक्तरीत्या न दोषः इत्याहुस्तन्न, 'एकदेशविकृत'[1] न्यानेन दोषस्य दुर्वारत्वात्। अत एव 'मघवतः' धीवरी इत्यादौ नाल्लोपः।

अथ अन इत्यपकर्षसामर्थ्याच्छ्रूयमाणान्न एवं तत्प्रवृत्त्यङ्गीकारे परत्वाट्टिलोपे मूलोक्तस्य शावयति इत्यस्यानापत्तिः। न चेष्टवद्भावेन भत्वात् सम्प्रसारण-प्राप्तेरत्र वाच्यत्वेनैव 'अतद्धिते'[2] इति निषेधात् सम्प्रसारणस्यैवाप्राप्तेः कथम् 'शावयति' इति सिद्ध्यतीति वाच्यम्, णेस्तद्धितत्वाभावादिष्ठनि परतः पूर्वस्य जायमानकार्यातिदेशेऽपि णेस्तद्धितत्वानतिदेशात्। न चैवम् 'नस्तद्धिते'[3] इति टिलोपस्याप्यनापत्तिः तद्धितत्वा-भावादिति वाच्यम्, सत्यपि तत्त्वे 'ब्रह्मिष्ठः' इत्यादौ तस्य दृष्टत्वमात्रेण प्रकृतेऽप्यतिदेशे नाक्षतेः।

न च 'दविष्ठः' इत्यादावोर्गुणस्यापि दृष्टत्वेन तस्याप्यतिदेशः स्यादिति वाच्यम्, तत्र कर्त्तव्ये सम्प्रसारणटिलोपयोराभीयत्वेनासिद्धत्वात्, परत्वेन 'आदिष्टादुपदिष्टं बलीयः' इति न्यायेन ''अचोञ्णिति''[4] इति वृद्ध्या बाधाच्च। न च श्वच्छब्दादिष्ठनि मतुपो लुकि 'नस्तद्धिते' इति टिलोपे 'श्विष्ठः' इत्यत्रातद्धित इति निषेधस्यापि दृष्टत्वे सम्भव इति वाच्यम्, लाघवादतद्धित इत्यत्र पर्युदासस्यैवाश्रयणादिष्ठनि परतः पूर्वस्य सम्प्रसारणनिषेधार्थम्, युवतीः इत्यत्र विभक्तौ लिङ्ग-विशिष्टाग्रहणादिति दोषं परिहृत्य तत्प्रत्याख्यातम्।

शावयति इत्यस्यानिष्टत्वेनादोषादिति चेत् न, मघवन् शब्दस्य छान्दसत्वपक्षे मघशब्दान्मतुपा 'मघवतः' इत्यस्य सिद्ध्याऽन इत्यनुवृत्तेः फलाभावात्। युवानमाचष्टे 'युवयति' इत्यत्र भत्वाटिट्लोपे सम्प्रसारणाभावस्तु न फलम्, उक्तरीत्याऽत्र सम्प्रसारणाप्राप्तिरित्याशयात्, मघवन् शब्दस्य लोकेऽपि सत्त्वपक्षेऽस्या अन्यार्थमावश्यकतया-ऽत्रापि तथैव वारणसम्भव इत्याशयात्।

अत्र विभक्ताविति-**विषयसप्तमी**। विभक्तिप्रयोज्य-कार्य इत्यर्थः। अत एव 'शून्या' इत्यत्र गौरादित्वान्ङीषि कृते प्राप्तस्य ''उदात्तयणो हल्पूर्वात्''[5] इति विभक्ति स्वरस्य न गोश्वान्[6] इति न प्रतिषेध इति 'युवोरनाकौ'[7] इत्यत्र भाष्ये उक्तम्।

ननु चित्रगणीणाम् इत्यादौ णत्वानापत्तिः, कवर्ग-वदुत्तरपदाक्षिप्तसमासरूपप्रातिपदिकप्रकृतिकविभक्तेरेव तत्र ग्रहणेन ङ्यन्ते लिङ्गविशिष्टपरिभाषया तदतिदेशे कर्त्तव्येऽन्या निषेधप्रसङ्गात् प्रकृतेः समासत्वाभावादिति चेत्, न, समासरूपप्रातिपदिकस्यैव ग्रहणे ''बहुचतुरङ्गेण'' इत्यादौ णत्वानापत्त्या त्वदुक्त-प्रत्यासत्तेराश्रयितुम-शक्यत्वात्।

**हैमवतीकारः**- 'प्रतिपादिकग्रहणे' इत्यस्यापवाद-भूतां परिभाषामवतारयति। एवं लिङ्गविशिष्टपरिभाषा स्त्रीप्रत्ययान्तरसमुदाये स्त्रीप्रत्ययप्रकृतिधर्मातिदेशे। युवतीः पश्य इति। अत्र 'ति' प्रत्ययान्ते युवन्शब्दत्वमतिदिश्य' 'श्वयुवमघोनामतद्धिते' इति सम्प्रसारणापत्तिः स्यात्।

ननु 'मघवतः' इत्यादौ सम्प्रसारणवारणाय 'श्वयुव' इति सूत्रे 'अल्लोपोऽनः' इत्यतोऽन इत्यस्यापकर्षणेन नकारप्रश्लेषेण च नकारान्तानामन्नन्तानां श्वादीनां सम्प्रसारणविधानाद् नकारान्तत्वस्य च वर्णत्वव्याप्य-धर्मघटितत्वेन लिङ्गविशिष्टपरिभाषाया अतिदेशासम्भवाद् दोषाभावेनावतरणमिदमसङ्गतमिति चेत्, न, स्त्रीलिङ्ग-सखीशब्दे सखिशब्दत्वातिदेशेन ततः परस्य सर्वनामस्थानस्य 'सख्युरसम्बुद्धौ' इति णिद्वद्भावापत्तेः, सौ चानङ्ादेशापत्तेः, सुपथीशब्दे च सुपथिन्

शब्दत्वातिदेशेन 'पथिमथ्यृभुक्षामात्' इति सौ परे आत्वापत्तेश्चोपलक्षणत्वादवतरणसङ्गतेः।

**परिभाषार्थस्तु** – विभक्ताविल्यस्य विषयसप्तमीत्वेन विभक्त्युद्देश्यके विभक्तिनिमित्तके चेति सर्वस्मिन्नपि विभक्तिसम्बन्धिकार्ये लिङ्गविशिष्टपरिभाषा न प्रवर्तत इत्यर्थः। अत एव शुनीशब्दात् तृतीयैकवचने 'शुन्या' इत्यादौ गौरादि ङीष्स्थानिकयणमाश्रित्य प्राप्तस्य उदात्तयणो हल्पूर्वात् इति विभक्त्युदात्तत्वस्यानया शुनीत्यत्र श्वन् शब्दत्वमादाय 'न गोश्वन्' इत्यनेन प्रसक्तः प्रतिषेधो न, अस्य विभक्तिसम्बिधत्वात्। एवं 'सख्यौ' इत्यत्र सख्युरसम्बुद्धौ इति णिद्वद्भावः ''दीर्घाह्नी प्रावृट'' इत्यत्र ङीषन्ते अह्नीशब्दे लिङ्गविशिष्टपरिभाषया अहन्शब्द-त्वमादाय 'अहन्' इत्यनेन रुत्वञ्च न, तस्य पदत्वद्वारा परम्परया विभक्तिनिमित्तककार्यत्वेन 'प्रातिपदिकग्रहण' परिभाषाया अनया निषेधात्।

ननु चित्रगवीणाम्' इत्यत्र 'कुमति च' इत्यनेन णत्वं न स्यात्, प्रत्यासत्त्या कवर्गवदुत्तरपदघटितसमासप्रकृति-विभक्ति संबंधिनकारस्यैव तेन णत्वम्। अत एव 'पूर्णपाकानां विपाकः' इत्यत्र 'षष्ठ्या आक्रोशे' अत्यलुकि कवर्गवदुत्तरपदघटितसमासत्वेऽपि विभक्तेस्तत्प्रकृतिक-विभक्तित्वं वक्तव्यम्। सा च विभक्तिकार्यत्वेनानया निषिद्ध्येतेति चेत्, न, ''अटकुप्वाङ् इत्यनेनैव''सिद्धेः।

**भाष्ये**- ''युवोरनाकौ'' इति सूत्रे भाष्ये 'विभक्तौ लिङ्ग-विशिष्टग्रहणं न इत्येषा परिभाषा कर्तव्या' इत्युपक्रम्यात्र प्रदर्शितानि, अन्यानि च प्रयोजनानि प्रदर्शितानि। ज्ञापकञ्च नोक्तम् अतो **वाचनिकीयम्।** 'शक्तिलाङ्गलाङ्कुशतोमरयष्टिघटघटीधनुष्षु ग्रहेरुप-संख्यानम्' इति वार्तिके घटग्रहणेनैवानया परिभाषाया घटीग्रहणे सिद्धे द्वयोरुपादानम् ''लिङ्गविशिष्ट'' परिभाषा अनित्यत्वे ज्ञापकम्। तदेवास्य वचनस्य मूलमित्यन्य आहुः- अत्रान्ये इति अनेनारुचिः प्रदर्शिता। तत्र बीजं तु ज्ञापकस्यास्य भाष्याविचारितत्वमिति भावः।

अत्र मया विचार्य्यतेः- एवं हि प्रतिपाद्यं समानमेवोभयोः, प्रतिपादनं भवतु नाम भिन्नमित्यस्मात्र तावदुल्लेखनीयं किञ्चिद् वैशिष्ट्यं कस्यचित्। परिभाषायां विभक्ताविति पदे विषयसप्तमी। तत्तस्याः किम्फलमिति जिज्ञासायां सर्वमङ्गलाहैमवतीकाराभ्याञ्च न्यरुपि। तुल्य-मेवोभयोरत्रापि व्याख्यानम्। तस्मात् केवलमुक्तमेव सर्वमङ्गलाव्याख्यानमत्रत्यमुपन्यस्यते-विषयसप्तम्या विभक्तिसम्बन्धिकार्ये कर्त्तव्ये प्रातिपदिकग्रहणपरिभाषा न प्रवर्त्तते इत्यर्थः।

तेन विभक्त्युद्देश्यकविभक्ति-निमित्तकानां सर्वेषां ग्रहणम्, अतएव शुन्ये इत्यादौ गौरादिङीष्स्थानिकय-णमाश्रित्य प्राप्तस्य उदात्तयणो हल्पूर्वादिति विभक्त्-युदात्तत्वस्य लिङ्गविशिष्टपरिभाषया 'न गोश्वन्नि' त्यनेन गोशब्दात्श्वशब्दात् परस्य स्वरो नेत्यर्थकेन प्रसक्तः प्रतिषेधो न, एतस्यापि विभक्तिसम्बन्धित्वात्। सख्यावित्यादौ सख्युरसम्बुद्धाविति णिद्वद्भावश्च न ''दीर्घाह्नीप्रवृडि-त्यत्रायस्कर्णीत्यत्रेव'' ङीबन्ते अहनीशब्दे लिङ्गविशिष्ट-परिभाषया अह्नशब्दत्वमादाय अहन्नित्यनेन न रुत्वं, तस्य पदत्वद्वारा परम्परया विभक्तिनिमित्तकार्य्यत्वेन अनया प्रातिपदिकग्रहणपरिभाषया निषेधात्।

ननु चित्रगवीणामित्यत्र कुमति चेत्यनेन णत्वं न स्यात्, प्रत्यासत्त्या कवर्गवदुत्तरपदघटितसमासप्रकृतिकविभक्ति-सम्बन्धिनकारस्यैव च तेन णत्वम्, अतएव आक्रोशे षष्ठ्या अलुकि पूर्वपापानां विपाकेन इत्यत्र कवर्गवदुत्तर-पदघटितसमासत्वेऽपि विभक्तेस्तत्प्रकृतिकत्वाभावान्न णत्वम्, ततश्च चित्रगवीणामित्यत्र ङीबन्ते कवर्गवदुत्तर-पदघटितसमासत्वं लिङ्गविशिष्ट परिभाषयैवानीय तत्प्रकृतिकविभक्तित्वं वक्तव्यम्। सा च विभक्तिकार्य-त्वेनानया निषद्धेति चेत् न, ''अट्कुप्वाङि' त्यनेनैव सिद्धेः।''

**सन्दर्भाः**- 1. परिभाषा संख्या – 73, 2. 'श्वयुवमघोनामतद्धिते' (पा. सूत्र-6/4/133), 3. पा. सूत्र – 6/4/144, 4. पा. सूत्र – 7/2/115, 5. पा. सूत्र – 6/1/154, 6. पा. सूत्र-6/1/862, 3. पा. सूत्र – 7/1/1

**एसोसिएट प्रोफेसर**
**स्व. श्री लक्ष्मी कुमारी बधाला गर्ल्स पी.जी. कॉलेज,**
**गोविन्दगढ़, चौमूं (जयपुरम्)**

# व्याकरणशास्त्रस्य प्रमुखप्रयोजनानि

❑ डॉ. उषाकिरणयादवः

ऋषिभिर्बहुभिर्दृष्टो वेदोऽखिलमानवजातेः ज्ञानस्य सनातनो मूलाधारो विद्यते धरायाम्। वेदस्य सुगमसम्यगवग्रहणार्थं रचितेषु षड्वेदाङ्गेष्वेकमस्ति- व्याकरणम्। प्रमुखतो वेदपुरुषस्य मुखङ्कथितं **पाणिनीयशिक्षायाम्**-

**'शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**[1]**'** तात्पर्यार्थोऽयमस्ति कथनस्य यत् पुरुषस्थाने यादृशी महत्ता मुखस्यास्ति तादृश्येव विद्यते व्याकरणस्य वेदाङ्गेषु। पाणिनेरष्टाध्यायी व्याकरणस्य महत्तायाः महन्निदर्शनमस्ति, साक्षात् ग्रन्थोऽयं सम्पूर्णसंस्कृत-वाङ्मयस्य स्तम्भो विद्यते। सर्वशास्त्रोपकारकस्य व्याकरणशास्त्रस्य महिमावबोधः महर्षिपतञ्जलिना महाभाष्ये प्रतिपादितैः प्रयोजनैर्भवति सम्यग्रूपेण। लेखेऽस्मिन् महाभाष्योक्तप्रयोजनानामेव निरूपणस्य लघुप्रयासः क्रियते मया यतो व्याकरणस्याध्ययने रुचिः प्रवृत्तिश्चानवरतं क्षीयते।

व्याकरणमहाभाष्ये प्रयोजनानां निरूपणं प्रधान-गौण इति भेदेन द्विधा कृतम्। प्रधानप्रयोजनान्यभिधयोक्तानि गौणानि च सांकेतिकरूपे। लेखेऽस्मिन् प्रधानप्रयोजनानि प्रतिपाद्यन्ते प्रदीपभाष्यानुरूपम्। इदं वर्णनमधोलिखितरूपेऽस्ति-

**व्याकरणशास्त्राध्ययनस्य प्रमुखप्रयोजनानि**

महाभाष्यानुसारं व्याकरणशास्त्रस्य अध्ययने पञ्च प्रयोजनानि मुख्यानि भवन्ति-रक्षा, उह, आगमः, लघु असन्देहश्च। **'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्।**[2]**'** **रक्षा**-वेदानां रक्षणं व्याकरणस्य प्रथमं प्रयोजनमस्ति। रक्षेयं व्याकरणस्य लोपागमवर्णविकारत एव सुष्ठुतया कर्तुं शक्यते। महाभाष्यस्य **प्रदीप**टीकायां स्पष्टीकृत-ङ्कारणमस्य यल्लोके लोपादय अदृष्टाः भवन्ति अर्थाद् द्रष्टुं न शक्यन्ते तान् वेदेषु दृष्ट्वा अवैयाकरणाः भ्रमिता भवितुं शक्नुवन्ति किन्तु वैयाकरणो भ्रमितो न भविष्यति वेदार्थञ्च ज्ञास्यति।[3] मतस्य पुष्टिरुदाहरणैः कृता **प्रदीपे** यथा-देवा अदुह्र-इत्यत्र दुह-धातोः लङ्लकारे प्रथमपुरुषस्य बहुवचने-झस्य स्थानेऽदादेशः तकारलोपश्च कृतः। रुडागमे कृते रूपमेतद् सिद्धं भवति। उद्ग्राभं च निग्राभं चेति वर्णविकारस्योदाहरणं प्रत्तम्। अत्र हकारस्य स्थाने भकारः कृतः।[4]

**ऊहः**- व्याकरणशास्त्रस्यापरं प्रयोजनमस्त्यूहः। वेदानाम्मन्त्राः सर्वविभक्तिषु सर्वलिङ्गेषु च नोक्ताः। ऋत्विजेन मन्त्रेष्वेषां यथोचितं परिवर्तनं करणीयम्। यो व्याकरणं न जानाति सः कार्यमिदं कर्तुं न शक्नोति, कारणेनानेन व्याकरणस्य पठनमावश्यकमस्ति।[5] अंशस्यास्य विस्तारः कृतः प्रदीपे इत्थम्- येभ्यो येज्ञेभ्यो विधेः उपदेशः क्रियते ते प्रकृतियज्ञाः कथ्यन्ते। विकृतियज्ञास्तदनुरूपमेव क्रियन्ते। ऊहवान् वैयाकरण एव विकृतियज्ञेषु विभक्त्यादिपरं परिवर्तनं समीचीनं कर्तुं शक्नोति, यथा- 'अग्नये त्वा जुष्टं निर्वपामि' इति मन्त्रे प्रयुक्ता चतुर्थी (अग्नये) इव वैयाकरणः 'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चस्कामः' इत्यत्रापि सौर्यं-सूर्याय इति चतुर्थ्यर्थं गृह्णाति।[6] **आगमः**- इदन्तृतीयप्रयोजनमस्ति व्याकरणस्य। महाभाष्यकारस्य मतमस्त्यत्र यत् श्रुति एकं कारणमस्ति वेदाध्ययनस्य ''ब्राह्मणेन निष्कारणो धर्मः

षडङ्गो वेदोऽध्येयो ज्ञेयश्च'' इति वचनमुद्धृतमस्ति विधानस्वरूपम्। महाभाष्ये स्पष्टीकृतं यत् षडङ्गेषु व्याकरणं प्रमुखमस्ति। प्रमुखे विहितः प्रयास एव सार्थको भवति इति मतमस्ति पतञ्जलेः।[7] प्रदीपे स्पष्टीकृतं यत्पदपदार्थयोर्ज्ञानेनैव वाक्यवाक्यार्थयोर्ज्ञानं भवत्यतः व्याकरणस्याध्ययनमनिवार्यमस्ति।[8]

**लघुता**- चतुर्थप्रयोजनमस्ति व्याकरण स्यलघुता। तात्पर्यमिदमस्ति यल्लघुतया ज्ञानस्य प्राप्त्यर्थमपि व्याकरणमध्येयम्। महाभाष्ये कथितं यद् ज्ञानकार्ये संलग्नस्य ब्राह्मणस्य कृते शब्दज्ञानस्य विधानमस्ति, शब्दानां ज्ञानञ्च विना व्याकरणं केनाप्युपायेन लघुतया भवितुमशक्यमस्ति।[9] अत्र प्रदीपकारस्य मतमस्ति यदशब्दज्ञस्याध्यापनकर्तुः समीपे शिष्याः अध्ययनार्थं-नागमिष्यन्ति- 'न चाशब्दज्ञं तमुपश्लिष्यन्ति शिष्या इति।'[10]

**असन्देहः** - व्याकरणस्य पञ्चमप्रयोजनमस्त्य-सन्देहः। एकेनोदाहरणेन स्पष्टीकृतमिदम्प्रयोजनम्, यथास्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत। अत्र स्थूलपृषतीम्-इत्यस्य द्वौ विग्रहौ भवितुं शक्येते- 'स्थूला चासौ पृषती च स्थूलपृषती'' 'स्थूलानि पृषन्ति यस्याः सा स्थूलपृषती ।'

अत्र कोऽर्थो ग्राह्योऽस्ति इति स्वरज्ञानयुक्तः वैयाकरण एव कर्तुं शक्नोति न त्ववैयाकरणः। वैयाकरणः जानाति यदि पूर्वपदप्रकृतिस्वरत्वमस्ति तदा बहुब्रीहिः, यदि समासान्तोदात्तत्वं विधीयते तर्हि कर्मधारयः (तत्पुरुषभेदः) अस्ति।[11] **प्रदीप**-टीकानुसारमत्र सन्देहस्य प्रागभावो ग्रहणीयो न तु प्रध्वंसाभाव अर्थात् संशयस्य विनाशः न भवत्यपितु वैयाकरणे सन्देहस्य जन्मैव न भवति।[12]

निष्कर्षोऽयमस्ति यदुपर्युक्तप्रयोजनैर्व्याकरणमवश्यं पठनीयं, किन्त्वद्यत्वे एषा प्रवृत्ति अपक्षीयतेऽनवरतमतः प्रयोजनानां ज्ञानमावश्यकमस्ति, तदर्थमेवैषः लघुप्रयासः कृतः।

**सन्दर्भाः**-


1. पाणिनीयशिक्षा, कारिका 42
2. व्याकरणमहाभाष्यम्, प्रथमाध्याये प्रथमपादः पृष्ठांकः 09, व्याख्याकारः डॉ. रमाकान्तपाण्डेयः। जगदीशसंस्कृतपुस्तकालयः, जयपुर-2007
3. रक्षार्थं वेदानामध्येयं व्याकरणम्। लोपागमवर्ण-विकारज्ञो हि सम्यग् वेदान् परिपालयिष्यतीति। तत्रैव पृ. 09
4. तत्रैव प्रदीपटीका, पृ. 10
5. तत्रैव पृ. 10
6. तत्रैव पृ. 10
7. तत्रैव पृ. 11
8. तत्रैव पृ. 11
9. तत्रैव पृ. 11
10. तत्रैव पृ. 11
11. तत्रैव पृ. 12
12. सन्देहस्य प्रागभावोऽत्र द्रष्टव्यो न तु प्रध्वंसाभावः, न हि वैयाकरणस्य संशय उत्पद्य विनश्यति। इतरस्यैव तदुत्पादात्। तत्रैव् पृं. 12



**सह-आचार्या, संस्कृत-विभागः**

**से.मु.मा. राजकीय स्नातकोत्तरकन्यामहाविद्यालयः**

**भीलवाड़ानगरम् (राजस्थानम्)**

# समावेशिशिक्षायाः उपयोगिता महत्त्वं च

❑ स्नेहलता शर्मा

समावेशिशिक्षापद्धतिः तादृशी पद्धतिरस्ति यत्र दिव्यांगबालकानाम् अध्ययनम् अध्यापनं सामान्य-बालकैः सहैव कार्यते। अत्र विशेषतया आवश्यकतावतां बालकानां सामान्यबुद्धिबालकैः सह अध्ययनाध्यापनेन उभयोर्मध्ये समानता वृद्धिं गता विषमता च व्यपगता।

विशिष्ट-आवश्यकतावतां बालकानां बुद्धिः सामान्यबुद्धिबालकेभ्यो भिन्ना दृश्यते। किन्तु समावेशिशिक्षापद्धत्या उभयविधबालकानाम् अध्यापनेन उभयेषां सामंजस्यं दृश्यते। विशिष्ट-आवश्यकतावन्तो विशिष्टा बालकाः विशिष्टविद्यालयेषु विशिष्ट-अध्यापकैः विशिष्टशिक्षापद्धत्या अध्याप्यन्ते। एतादृशेषु बालकेषु सामान्यबालकानाम् अपेक्षया हीनभावना जागर्ति तेन च सामान्यबालकैः सह तेषां सम्मेलनं दुष्करं भवति। इत्थम् उभयोः दृष्टौ चिन्तने च भेदो दृश्यते।

समावेशिशिक्षापद्धतेः आश्रयणेन विशिष्ट-आवश्य-कतावन्तो विशिष्टा बालकाः सामान्यबुद्धिबालकैः सह सरलतया सहजतया च पाठ्यन्ते, ते च सरलतया शिक्षन्ते। अनया पद्धत्या तेषां स्तरोन्नयनमपि संजायते। अनेन तेषां निरन्तरं सामाजिकविकासो भवति चिन्तने च परिवर्तनं जायते। परिणामतः सामान्यबुद्धिबालकबालिकाभिः सह विशिष्ट-आवश्यकतावतां बालकानाम् आत्मीयसम्बन्धः संजायते। उभये अपि भाषाशिक्षणे आत्मसाहाय्यं कर्तुं समर्थाः भवन्ति। सामान्यबुद्धिबालकबालिकाभिः सह सहयोगेन भाषायाः आदान-प्रदानेन च ते समाजस्य मुख्यधारायां संयुक्ताः जायन्ते। किंच तेषां सामाजिकः भावनात्मकः, शारीरिकः संवेदनात्मकश्च सर्वांगीणो विकासो जायते। सहैव तेषां विशिष्ट-आवश्यकतावतां बालकानां व्यावसायिकं कौशलं समाजे सम्मानश्च वृद्धिं प्राप्नोति। सामान्यशिक्षकाः विशिष्ट-आवश्यकतावतां बालकानां शिक्षणे बाधामनुभवन्ति। यतो हि तेषां सविधे विशिष्टशिक्षापद्धतेः तत्सम्बद्ध-अध्यापनविधीनां च ज्ञानं न भवति। अतः सामान्यशिक्षकाणां कृते विशिष्ट-आवश्यकतावतां बालकानाम् अध्यापनाय तेषामभि-ज्ञानाय तेषां भाषाविषये लेखनविषये च प्रशिक्षणस्य च महती आवश्यकता भवति। अनेन प्रशिक्षणेन विशिष्ट-आवश्यकतावतां बालकानामध्ययनमध्यापनं प्रभावि संजायते।

अध्यापनसमये कक्षायाः प्रबंधनम् अध्यापकेन तथा विधेयं यथा विशिष्ट-आवश्यकतावन्तो बालकाः श्यामफलकं पुस्तकं, पोस्टरं, smart class screen projector च स्पष्टं द्रष्टुं शक्नुयुः, अध्यापनं च तेषां विशिष्ट-आवश्यकतावतां बालकानां रुच्यनुगुणं भवेत् येन हि तेषां जिज्ञासा निरन्तरं वर्धमाना स्यात्। तदनुसरणे च ते तत्पराः भवेयुः। सामान्यबुद्धिबालकानां मध्ये-मध्ये एकः विशिष्ट-आवश्यकतावान् बालकः उपावेशनीयः येन तेषु परस्परं सहजभावो विकसितः स्यात्, आत्मीयभावश्च वृद्धिं प्राप्नुयात्। अध्यापनकाले पाठ्यसहायकसामग्र्याः उपयोगकरणेन अध्ययनाध्यापनं रुचिकरं सम्पादनीयम्। मध्ये-मध्ये प्रश्नोत्तरद्वारा ते सक्रियाः सावधानाश्च स्थास्यन्ति।

सामान्यशिक्षक: विशेषतया आवश्यकतावतां बालकानां शिक्षणसमये शान्तिं, धैर्यं, दृढनिश्चयं, मृदुभाषित्वं चेत्यादिगुणान् आवश्यकरूपेण आत्मनि संधारयेत्। वयं सर्वे सामाचारपत्रेषु, दूरदर्शनप्रभृतिषु च पश्याम: यत् बहुभि: दिव्यांगजनै: तादृशानि अदम्यसाहसिकानि कार्याणि विहितानि येन ते अन्येषां कृते अनुकरणीया: आदर्शरूपाश्च अभूवन्। दिव्यांगता उन्नते: अवरोधिका अस्तीति चिन्तनं समीचीनं नास्ति, अत: एतेषाम् उदाहरणानि दृष्ट्वा अस्माकं विचारसरणि: परिवर्तनीया।

उपर्युक्तेन विवरणेन एतत् स्पष्टं भवति यत् विशिष्ट-आवश्यकतावतां बालकानाम् अध्यापनं यदि सामान्यबुद्धिबालकै: सह आयोज्येत तर्हि अनुकूला: सकारात्मका: परिणामा: प्राप्तुं शक्यन्ते। दिव्यांगजनै: विभिन्न-कार्येषु विविध-मानदंडा: स्थापिता: सन्ति। उदाहरणरूपाश्च ते संजाता:। समावेशिशिक्षाद्वारा दिव्यांगजनानां समाजीकरणं विधेयमस्ति येन ते स्वकीयं सर्वांगीणं विकासं कृत्वा समाजस्य मुख्यधारायां संयुक्ता: भवेयु:, स्वकीयं जीवनं सुख-शान्ति-समृद्धियुतं च यापयेयु:। एतदेव समाजीकरणमस्तीति अवधेयम्।

समावेशिशिक्षाया: सुपरिणामै: अधुना अनया पद्धत्या उभयविध (सामान्यबुद्धि-विशिष्ट) बालकेभ्यो शिक्षा प्रदीयमाना अस्ति। सर्वकारेण अस्यां पद्धतौ सामान्यशिक्षकेभ्य: विशिष्टं प्रशिक्षणं दीयते। एतत् सम्बलशिक्षाया: उत्तमम् उदाहरणमस्ति।

दिव्यांगताक्षेत्रे एका सूक्ति: प्रचलितास्ति –

**क: कथयति यत् हस्तरेखा: भाग्यं रचयन्ति।**
**भाग्यं तु तेषामपि भवति ये हस्तविहीना: भवन्ति।।**

**विशेषशिक्षिका**
**राजकीय-उच्च-प्राथमिक-विद्यालय:, जोगीपुरा,**
**नदबई, भरतपुरम्**
**दूरभाषाङ्का: 9799096719**

# पाठकविचारा:

'भारती' पत्रिकाया: संस्थापकप्रबन्धकमहोदयानां श्रीगिरिराजशास्त्रिणां जन्मशताब्दीविशेषाङ्कमधीत्य अत्यन्तं प्रसन्नताऽभवत्। सम्पादकानां समस्तानां परिचय: सुष्ठु: प्रदत्त:। एषु परमादरणीया: श्रीमन्तो **जगदीशाचार्या:** मम गुरव: आसन् वनस्थलीविद्यापीठे। भारत्या: **सम्पादकीयम्, नारी-स्तम्भ:, आयुर्वेद-स्तम्भ:, पुस्तकसमीक्षास्तु** पत्रिकाया: भास्वरा: भागा: सन्त्येव। अन्येऽपि शोधलेखप्रभृतयो मह्यं रोचन्ते। प्रकृते विशेषाङ्के **'दादाभाई'** महोदयानां सम्पूर्ण-मितिवृत्तम्, 'भारती-पत्रिकाया विकासयात्रां' च पठित्वा हर्षस्य विशेषास्नुभूति:। अधुना भारत्या: सर्वथा **शुद्धसम्पादनं** नीरक्षीरविवेकिनां सम्पादकमहोदयानां वैशिष्ट्यं प्रतिपादयति। 1986 ई. वर्षतोऽहं निरन्तरं भारती-पत्रिकायां लिखामि। एवमेव पत्रिकाया: निरन्तरप्रकाशनं कामये।

**डॉ. ऊषाकिरणयादव:**
**सह आचार्य:, संस्कृत विभाग:,**
**से.मु.मा. राजकीय-स्नातकोत्तरकन्या-कॉलेज:,**
**भीलवाड़ा-राजस्थानम्**
**चलसंकेताङ्का: 9414812105**

# विष्णुपुराणस्य वर्ण्यविषयः

❑ राजबाला महला

भाषा जनानां भावाभिव्यक्तये सशक्तं साधनं वर्तते। अन्यैरपि चेष्टादिभिः साधनैः भावाभिव्यक्तिस्तु भवितुमर्हति किन्तु तत्र न सम्पूर्णता आयाति। भाषैव सा शक्तिर्विद्यते मनुष्यो यया पशुतो भिद्यते। विश्वस्य प्राचीनतमा भाषा विद्यते संस्कृतभाषा। संस्कृतभाषा देवभाषा[1] गीर्वाणवाणी इत्यादिभिर्नामभिः सम्बोध्यते।

संस्कृतभाषायाः व्याकरणम् संस्कृतभाषावत् प्राचीनतमं विद्यते। महाभारतेऽपि व्याकरणविषये निर्देशः प्राप्यते, तद्यथा–

**सर्वार्थानां व्याकरणाद्वैयाकरण उच्यते।**
**तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा।।**[2]

भाषासु प्रथमव्याकृतत्वेन प्रकृतिप्रत्ययादिविभागैः देवभाषा संस्कृतमित्युच्यते। तर्हि किं नाम व्याकरणमित्यपेक्षायाम् निगद्यते यत् वि आङ्पूर्वकाभ्यां कृधातोः ल्युटि प्रत्यये सति[3] व्याक्रियन्ते = व्युत्पाद्यन्ते शब्दा अनेनेति विग्रहे व्याकरणशब्दो निष्पद्यते। वाल्मीकिरामायणे[4] व्याकरणशब्दस्य निर्देशात् अस्य प्राचीनत्वं लोकोपकारकत्वञ्च सिध्यति–

**नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।**
**बहु व्याहरताऽनेन न किञ्चिदपभाषितम्।।**

1 दैवी वागवकीर्णेयमशक्तैरभिधातृभिः। वाक्यपदीयम्,1.154
2 महाभारतम् (उद्योग पर्व) 42/60
3 करणाधिकरणयोश्च अष्टा. 3/3/117
4 वा.रामा. 3/3/29

गोपथ ब्राह्मणेऽपि व्याकरणस्य पारिभाषिक-शब्दाः प्राप्यन्ते, यथा–धातुः, प्रातिपदिकम्, नामाख्यातम्, लिङ्गम्, वचनं, विभक्तिः, प्रत्ययः, स्वरः, उपसर्गो, निपातः, व्याकरणमित्यादयः शब्दा तत्र निर्दिष्टाः सन्ति[5]।

शब्दानुशासनसम्बद्धं व्याकरणम् सर्वातिशायीति। व्याकरणं वेदपुरुषस्य मुखरूपेण[6] स्मृतम्।

सामान्यतः शब्दानां सिद्धिपूर्वकसाधुत्वबोधकमेव व्याकरणस्य मुख्यम् प्रयोजनं विद्यते। अथ शब्दानुशासनम् इति वाक्यम् व्याकरणस्य महत्त्वं बोधयति। शब्दानामनुशासनमत्र कर्मणि षष्ठी, तेन शास्त्रमिदं शब्दान् अनुशास्ति। अनुशासनञ्च प्रकृतिप्रत्यविभागकल्पनया, सामान्यं विशेषवता च लक्षणेन। महाभाष्ये त्रयोदशानुषङ्गिकानि प्रयोजनानि निगदितानि। व्याकरणम् मोक्षमाणानां कृते राजपद्धतिरिव[7] वर्तते। वेदादारभ्य अद्यावधिपर्यन्तम् संस्कृतभाषायां निबद्धानां समेषाम् शास्त्राणां कृते उपकारकम् इदं शास्त्रम्। पुराणानां गणना गोपथब्राह्मणे उपवेदत्वेन कृता, यत्र अथर्ववेदस्योप–[8] वेदेषु पुराणस्य परिगणनं कृतम् विद्यते। व्यासव्यवस्थापिताष्टादश-

5 ओंकारं पृच्छामः, को धातुः, किं प्रातिपदिकं, किं नामाख्यातम्, किं लिङ्गम्, किं वचनं का विभक्तिः-... किं स्थाननादानुप्रदानानुकरणम्। गो. ब्रा. 1/24
6 पाणिनीयशिक्षा, 41-42
7 वाक्यपदीयम् (ब्रह्मकाण्डम्), 1.16
8 .... पुराणञ्च। गोपथब्राह्मणम्

पुराणेषु श्रीविष्णुपुराणमन्यतमं विद्यते। सत्त्वप्रधानमिदं पुराणं विद्यते। विष्णुपुराणम् महर्षिपराशरेण विरचितम्। तत्र श्रीमता पराशरेणोक्तम् यत् सम्पूर्ण-चराचराणा-मुत्पत्तिर्विष्णोरेव जाता। सः जगतः कर्त्ता धर्त्ता संहर्त्ता च विद्यते,[9] श्रुतिरपि कथनमिदं प्रमाणयति, यत्रोक्तम्-

**यतो वा इमानि भूतानि जायन्ते।**
**येन जातानि जीवन्ति। यत् प्रयन्त्यभिसंविशन्ति**
**तद्विजिज्ञासष्व। तद्ब्रह्म।**[10]

विष्णुपुराणस्य वर्ण्यविषये स्तोत्ररत्नप्रणेत्रा यामुनाचार्येण प्रोक्तम् यत्-

**तत्त्वेन यश्चिदचिदीश्वरतत्स्वभाव-**
**भोगापवर्गतदुपायगतिरुदारः।**
**संदर्शयन् निरमिमीतपुराणरत्नम्,**
**तस्मै नमो मुनिवराय पराशराय।।**[11]

श्रीविष्णुपुराणे विष्णुरेव परादेवतारूपेण वर्णितोऽस्ति। पुराणानुसारं जगत्परब्रह्मणोः शरीरशरीरि-रूपेण सम्बन्धो विद्यते। यथा आत्मानं विना शरीरं नश्यति तद्वत् विष्णुं विना जगदपि नाशमेष्यति, यथोक्तं राज्ञा केशिध्वजेन-

**आश्रयश्चेतसो ब्रह्म द्विधा तच्च व्यवस्थितः।**
**भूयो मूर्तममूर्तञ्च परं चापरमेव च।।**[12]

सम्पूर्णं पुराणम् पराशरमैत्रेययोः संवादस्वरुपेण विद्यते। अत्र षडंशाः 126 अध्यायाश्च विद्यन्ते। नारदीयपुराणानुसारम् विष्णुपुराणे 24000 श्लोकाः सन्ति किन्तु सम्प्रति 6030 श्लोका एव प्राप्यन्ते। अस्य पुराणस्य द्वे व्याख्ये प्राप्येते। प्रथमा विष्णुचित्तीया वर्तते। व्याख्येयं विशिष्टाद्वैतसिद्धान्तानुसारिणी विद्यते। अस्या व्याख्यायाः प्रणेता विष्णुचित्तो विद्यते। विष्णुपुराणस्य द्वितीया व्याख्या **आत्मप्रकाशो** विद्यते। अस्य लेखकः श्रीधरस्वामी वर्तते। व्याख्या प्रौढा अद्वैतसिद्धान्तानु-सारिणी वर्तते। अत्र सर्ग-प्रतिसर्गमन्वन्तराणाम् विषयाणां सम्यग्विवेचनं कृतमस्ति। सर्वेऽपि विषयाः सरलया भाषयोपस्थापिताः। पुराणैः वेदस्य समुपबृहंणं भवति। व्याकरणस्य **पञ्चवृत्तिषु** कृदन्तस्यापि परिगणनं कृतमस्ति। कृत्प्रत्ययान्तशब्दानाम् अत्र सुष्ठु प्रयोगो विद्यते। तद्यथा-प्रणिपत्य,[13] अधीतम्,[14] श्रोतुम्,[15] विद्विषः,[16] देव,[17] सम्भवम्,[18] संस्थानम्,[19] चरितम्,[20] वेदशाखाप्रणयनम्,[21] आश्रमवासिनाम्,[22] स्मारितः, विश्वामित्रप्रयुक्तेन, भक्षितः, श्रुतः, सञ्चितस्यापि, नाशकरः, अनुनीतः, उपसंहृतवान्, प्रीतः, दत्ताहर्यः, कृतासनपरिग्रहः, शास्त्राणि, सन्ततिः, ममोच्छेदः, क्रुद्धेनापि, पुराणसंहिताकर्ता, प्रवृत्ते, उक्तम्, उद्भूतम्, शुद्धाय, अविकाराय, प्रणम्य, अच्युतम्, सर्वभूतस्थम्, स्थितिः एतादृशाः कृदन्ताः शब्दाः पुराणेऽस्मिन् प्रयुक्ताः सन्ति येषां सम्यग् विमर्शोऽग्रे विधास्यते।

**ज.रा.राजस्थानसंस्कृतविश्वविद्यालयः, जयपुरम्।**

---

9 विष्णोः सकाशादुद्भूतं जगत् तत्रैव च स्थितम्।
स्थितिसंयमकर्ताऽसौ जगतोऽस्य जगच्च सः।।
विष्णु पु. 1/1/31
10 तैत्तिरीयोपनिषद् 3.1
11 विष्णुपुराणम्, आचार्यशिवप्रसादद्विवेदि सम्पादितम् (सांसर्गिकः पृ. 29)
12 विष्णुपुराणम्, 6/7/46

13 विष्णु पु. 1/1/1, 14 विष्णु पु. 1/1/2,
15 विष्णु पु. 1/1/4, 16 विष्णु पु. 1/1/3,
17 विष्णु पु. 1/1/4, 18 विष्णु पु. 1/1/6
19 विष्णु पु. 1/1/6, 20 विष्णु पु. 1/1/9,
21 विष्णु पु. 1/1/9, 22 विष्णु पु. 1/1/10

नारी-स्तम्भः

# जायापत्योर्न विभागो दृश्यते

❑ डॉ. राजेश्वरी भट्टः

वैदिककालादेव हिन्दुपरिवारेषु विवाहानन्तरं पतिपत्न्यौ मनसा, वाचा, कर्मणा परस्परं स्नेहेन, सहयोगेन, समर्पणभावेन भरितौ भाविजीवने प्रवर्तेते। अग्नेः साक्षिणि स्वजनानां सन्निधौ च व्याहृतैः शुभाशीर्वचनैः प्रहृष्टौ, उपकृतौ च नवदम्पती नवान् स्वप्नान् प्रत्यक्षीकर्त्तुं उत्साहवन्तौ दृश्येते। सम्प्रति सुखमयं जीवनं यापनाय यावतीषु योजनासु द्वयोः सहभागिता समानी भवति।

अस्मिन् क्रमे भवतु सुखदुःखयोः हानिलाभयोः जयपराजययोः सर्वास्ववस्थासु प्राप्तव्यस्य परिणामस्य कृते उभावेवोत्तरदायिनौ स्तः। एवमेव इह परत्र च शर्मणे पुण्यार्जनाय अनुष्ठितैर्यज्ञ-तपो-दान-व्रतोद्यापनादिभिः साधनैरधिगतानि पुण्यफलानि द्वावेव सहैव उपभुञ्जाते। अन्यच्च-श्रियोऽनुकम्पया आत्मनः पुरुषार्थेन वा संगृहीतेषु भूमि-भवन-भूषादिषु वैभववितानेषु पतिपत्न्योः समानाधिकारो विद्यते। अत्र परस्परं विभागस्य, विवादस्य, विखण्डनस्य कृते लेशोऽप्यवसरो नास्ति। कथितञ्च- **जायापत्योर्न विभागो दृश्यते। पाणिग्रहणाद्धि सहत्वं कर्मसु तथा पुण्यफलेषु, द्रव्य-परिग्रहेषु च।** आपस्तम्बधर्म सूत्र 6/16.17.18

दाम्पत्यजीवनस्य सुखमयं उदात्तञ्च स्वरूपं स्थिरीकर्त्तुं त्रिकालदर्शिन ऋषयः कवयश्च सततं प्रयत्नवन्तो दृश्यन्ते। वेदेषु, धर्मशास्त्रेषु, काव्येषु च गृहस्थाश्रमस्य श्रेष्ठतां प्रतिपादनपराण्यनेकानि मङ्गलमयानि वचनान्युदाहृतानि। ऋग्वेदे नवदम्पत्योः सुखमयं जीवनं कामयमानेन ऋषिणा उक्ता-न्याशीर्वचनान्यत्रोल्लेखनीयानि सन्ति। कथितश्च-

**इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम्।**
**क्रीडन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे।।**

ऋग्वेदः, 10/85/42

अर्थात् हे नवदम्पती युवाम् चिरकालपर्यन्तं परस्परं सहभावेन अत्रैव निवसताम्, युवयोर्जीवने कदापि वियोगो, विच्छेदो, विवादो वा न भवेत्। आजीवनं युवाम् पुत्रपौत्रनप्तृभिः सह तान् हर्षायन् हर्षेण स्वगृहे वसताम्। नूनं भारतीयपरिवारेषु सुखमयदाम्पत्य-जीवनस्य सफलताया मूलाधारौ श्रद्धाविश्वासौ वर्तेते। अत्र पत्युः कृते पत्नी श्रद्धायाः प्रतीकरूपेण मान्याऽस्ति, सहैव नार्योऽपि पुरुषस्य विश्वासाधारेणैव श्वसन्ति। **वाल्मीकि-रामायणेन** ज्ञायते यद् वने आश्रमाद् अपहृता भयेन कम्पिता अपि रामस्य सामर्थ्येन आश्वस्ता सीता रावणं ब्रूते-

**अपहृत्य शचीं भार्यां शक्यमिन्द्रस्य जीवितुम्।**
**न हि रामस्य भार्यां मामानीय स्वस्तिमान् भवेत्।।**

वा.रा., अरण्य. 48/33

एवमेव परिवारेषु नारीं प्रति पुरुषस्य श्रद्धा, निष्ठा च अलौकिकी दृश्यते। वनवाससमये आश्रमादपहृतां प्राणकल्पां सीतां आश्रमे न दृष्ट्वा रामस्य व्याकुलता सीतां प्रति रामस्य प्रगाढप्रेम्णः परिचायिका वर्तते। कथितञ्च-

**यां विना नोत्सहे वीर मुहूर्तमपि जीवितुम्।**
**क्व सा प्राणसहाया मे सीता सुरसुतोपमा।।**

वा. रा. अरण्यकाण्ड, 58/4

खेदोऽयं वर्तते यत् सच्छिक्षाया अभावेन, दुर्व्यसनानां प्रभावेण, प्रसारेण च, अपसंस्कृत्याः संक्रमणेन च युवान उन्मार्गिणो दृश्यन्ते। अनेन संक्रमितौ दम्पती अपि स्वधर्मं विस्मृत्य कर्तव्यान्युपेक्ष्य केवलं अधिकारानधिगन्तुं परस्परं कलहायेते। अस्मिन् द्वन्द्वे विवाहसूत्रं विच्छेत्तुं संकल्पितयोः स्वमर्यादां विस्मृत्य त्वं, त्वं, अहमहं कुर्वत्योः दम्पत्योः रमणीयं यौवनं न्यायालयं प्रति गतागती कुर्वन्तौ एव पलायते। दम्पत्योर्मध्ये विखण्डनस्येयं घटना परिवारस्य सुखशान्तिं च अवस्कन्दति। सहैव गृहस्थाश्रमस्य कल्याणकरं स्वरूपमपि विकृतायते। भारतीयपरिवारेषु (सस्कृतौ वा)दाम्पत्य- जीवनस्य लोकमङ्गलकरं स्वरूपं सर्वदा सुरक्षणीयं अनुकरणीयं च वर्तते।

## हिन्दी में

वैदिककाल से ही हिन्दू परिवारों के विवाह के पश्चात् पतिपत्नी मन, वचन, कर्म से परस्पर स्नेह, सहयोग एवं समर्पणभाव से सिक्त होकर भावी जीवन में प्रवृत्त होते हैं। अग्नि की साक्षी में, स्वजनों की सन्निधि में उद्घोषित सप्तपदी के मन्त्रों से पवित्र तथा पुरोहितों एवं परिजनों के आशीर्वचनों से प्रसन्न तथा उपकृत नव दम्पती संजोए हुए स्वप्नों को साकार करने के लिए उत्साहित दिखाई देते हैं। अब उनके समक्ष त्रिवर्ग को सुखमय बनाने वाली जितनी भी योजनाएं सम्भव हैं उनमें पति पत्नी की समान सहभागिता अपेक्षित है। सुख-दुःख, हानि-लाभ, यश-अपयश अथवा जय-पराजय सभी स्थितियों में प्राप्त होने वाले परिणाम के लिए पति-पत्नी दोनों ही समानरूप से उत्तरदायी हैं।

इस प्रकार इस लोक एवं परलोक में सुखप्राप्ति के लिए एवं पुण्य अर्जन करने के लिए संपन्न किए जाने वाले यज्ञ, तप, दान व्रत, उद्यापनादि साधनों से प्राप्त पुण्य-फलों को दोनों ही उपभोग करते हैं। इसी प्रकार लक्ष्मी की कृपा अथवा अपने पुरुषार्थ से संगृहीत भूमि, भवन, आभूषण एवं ऐश्वर्य की सामग्री पर भी पति-पत्नी का समान अधिकार होता है। इस विषय में परस्पर दोनों में विभाग, विवाद एवं विखण्डन का प्रश्न ही उपस्थित नहीं होता। कहा भी गया है-

पाणिग्रहण के समय से ही पतिपत्नी में किसी प्रकार का विभाग, अपेक्षित नहीं है। सम्पूर्ण कर्म में, पुण्य फलों एवं धन आदि की प्राप्ति में दोनों सहभागी हैं।

आपस्तम्ब धर्मसूत्र, 6/16/17/18

दाम्पत्य जीवन के लिए सुखद एवं उदात्त स्वरूप को समाज में स्थिर करने के लिए त्रिकालदर्शी ऋषि एवं क्रान्तदर्शी कवि सतत प्रयत्नशील रहे हैं। वेद, धर्मशास्त्र एवं काव्यों में यत्र तत्र गृहस्थाश्रम की श्रेष्ठता प्रतिपादन करने वाले अनेक मङ्गलमय वचन प्रस्तुत किए गए हैं। **ऋग्वेद** में नव युगल के सुखमय जीवन की कामना करते हुए ऋषि के द्वारा उक्त आशीर्वचन यहाँ उल्लेखनीय है ऋषि कहते हैं- **हे नवदम्पती ! तुम दोनों यहाँ( साथ ही ) ही रहो, परस्पर वियुक्त मत होना, आजीवन अपने पुत्र पौत्र एवं दौहित्र के साथ आनन्द करते हुए अपने घर में ही निवास करना।** ऋग्वेद, 10/85/42

निश्चय ही भारतीय परिवारों में सुखमय दाम्पत्य जीवन की सफल्ता का मूलाधार श्रद्धा एवं विश्वास है। यहाँ पति के लिए पत्नी श्रद्धा के प्रतीक के रूप में मान्या है। इसी प्रकार नारी भी पुरुष के विश्वास के आधार से ही प्राणधारण करती है। वाल्मीकि रामायण से ज्ञात होता है कि वन में आश्रम से रावण के द्वारा अपहृत, भय से कम्पित होने पर भी राम के सामर्थ्य से आश्वस्त सीता का

राम के प्रति दृढ़ विश्वास दर्शनीय है, **सीता रावण से कहती है- इन्द्र की पत्नी इन्द्राणी का अपहरण करके प्राणधारण करना सम्भव है, किन्तु राम की पत्नी मुझको ले जाकर कोई जीवित नहीं रह सकता है-** वा.रा.अरण्यकाण्ड, 48/53

इसी प्रकार हिन्दू परिवारों में नारी के प्रति पुरुष की श्रद्धा भावना अथवा, निष्ठा अलौकिकी है। वनवास अवधि में आश्रम से रावण के द्वारा अपहृत प्राण प्रिया सीता को वहाँ न देखकर राम की हृदयद्रावक व्याकुलता सीता के प्रति राम के प्रगाढ़ प्रेम की परिचायिका है। **राम कहते हैं** हे वीर (लक्ष्मण) जिस (सीता) के बिना मैं एक क्षण भी जीवित रहना नहीं चाहता हूँ, मेरे प्राणों की साधिका देवकन्या के समान सुन्दर मेरी सीता कहाँ है? वा.रा. अरण्यकाण्ड, 58/4

किन्तु खेद का विषय है आज सत् शिक्षा के अभाव में दुर्व्यसनों के प्रभाव एवं प्रसार से अपसंस्कृति के संक्रमण से हमारे युवक युवती संक्रमित हो रहे हैं। इससे प्रभावित तथा संक्रमित नव दम्पती भी अपने धर्म से विमुख अपने कर्त्तव्यों की उपेक्षा कर केवल अधिकारों की प्राप्ति के लिए कलह करते हैं। परस्पर दृढ़ विवाह सूत्र को तोड़ने के लिए संकल्पित अपनी मर्यादा को भूलकर एवं रमणीय यौवन तो न्यायालय के चक्कर लगाते लगाते न जाने कब हवा हो जाता है। पति पत्नी के बीच विखण्डन की यह घटना परिवार की सुख शान्ति को निगल (झपट) लेती है, साथ ही गृहस्थाश्रम के मङ्गलमय स्वरूप को भी विकृत कर देती हैं। भारतीय परिवारों (संस्कृति) में दाम्पत्य जीवन का लोकमङ्गलमय स्वरूप सुरक्षणीय एवं अनुकरणीय है।

**सी-276, भाभामार्गः, तिलकनगरम्, जयपुरम्**


**राष्ट्रीय विचारों के लिए पढ़ें**

(हिन्दी) साप्ताहिक **पाञ्चजन्य**

(English) Weekly **ORGANISER**

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



**You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org**

**वार्षिक ग्राहक शुल्क**

भारत में ₹ 700/- पाञ्चजन्य • ₹ 800/- ORGANISER (साधारण डाक द्वारा)

विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

**प्रसार विभाग**

**भारत प्रकाशन (दिल्ली) लिमिटेड**

2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055

फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in

आयुर्वेद-स्तम्भः

# वर्षाकाले नस्यगण्डूषकवलानां प्रयोगः

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**यद्यपि वर्तमानकाले ''कोरोना'' नामकस्य-व्याधेर्विशेषेण सङ्क्रमणं प्रसृतम्, पुनरपि वर्षाकाले कालप्रभावाद्बहुविधानामन्येषामपि च रोगाणामाक्रमणस्य संभावना वर्तते। अत एव नैक-विधानामुपक्रमाणामौषधविशेषाणाञ्च सेवनं तथा-करणीयं यथा विभिन्नानां व्याधीनामाक्रमणं संक्रमणञ्च न भवेत्। स्वस्थेन जनेन विधातव्याः ह्येत उपक्रमाः रुग्णावस्थायामपि लाभप्रदाः भवन्ति, रुग्णावस्थायान्तु चिकित्सकीयपरामर्शेनैवैतेषां प्रयोगः समुचितः, किन्तु स्वस्थावस्थायान्त्वेतेषां परिपालनमृतुचर्याक्रम एव करणीयम्। ह्येत उपक्रमाः भवन्ति निरापदस्वरूपाः।**

यद्यपि वर्तमान काल में कोरोना नामक व्याधि का संक्रमण विशेष रूप से प्रसरित है, फिर भी वर्षाकाल में काल के प्रभाव से अनेक प्रकार के अन्य रोगों के आक्रमण की भी संभावना रहती है, इसलिए अनेक प्रकार के उपक्रमों का और विशिष्ट औषधियों का सेवन उस प्रकार से करना चाहिए जिस प्रकार से कि विभिन्न व्याधियों का आक्रमण और संक्रमण न हो। स्वस्थ व्यक्ति के द्वारा किए जाने वाले ये उपक्रम रुग्णावस्था में भी लाभप्रद होते हैं, रुग्णावस्था में तो चिकित्सकीय परामर्श से ही इन उपक्रमों का प्रयोग उपयुक्त है, किंतु स्वस्थावस्था में तो इनका परिपालन ऋतुचर्या के क्रम में ही करना चाहिए। ये सभी उपक्रम निरापद स्वरूप होते हैं।

**यद्यपि शिशिरादिषु ऋतुषु भिन्न-भिन्नोपक्रमो-पचर्येण स्वास्थ्यसंरक्षणस्यावश्यकता वर्तते, न हि सर्वेषु ऋतुष्वेकस्वरूपात्मकानामाहारनिद्राव्या-यामाभ्यंगचङ्क्रमणेत्यादीनां परिपालनं समुचितं भवत्यपितु भिन्नेषु भिन्नेषु ऋतुषु भिन्न-भिन्नस्वरूपा-त्मकानामाहारादीनामुपयोगः सुखावहो भवति। तैर्ह्यजातानां विकाराणामनुत्पत्तिर्भवति तथा निरंतरं स्वास्थ्यसंरक्षणमपि च जायते।**

यद्यपि शिशिरादि (शिशिर-वसन्त-ग्रीष्म-वर्षा-शरद् एवं हेमन्त इन) ऋतुओं में भिन्न-भिन्न उपक्रमों के उपचार से स्वास्थ्यसंरक्षण की आवश्यकता है। सभी ऋतुओं में एक जैसे आहार, निद्रा, व्यायाम, अभ्यंग, चङ्क्रमण (घूमना) इत्यादि का परिपालन समुचित नहीं होता है, अपितु भिन्न-भिन्न ऋतुओं में भिन्न-भिन्न स्वरूपात्मक आहार इत्यादि का उपयोग सुख लाने वाला होता है। इनके सेवन से अजात विकारों (अर्थात् जो विकार उत्पन्न नहीं हुए हैं लेकिन काल के विकृतिकारक प्रभाव से उत्पन्न हो सकते हैं उन विकारों) की उत्पत्ति नहीं होती है तथा निरन्तर स्वास्थ्य का संरक्षण भी हो जाता है।

**तच्च स्वास्थ्यमुभयथा परिपाल्यते विशुद्धाहारा-चाराभ्यां सदा क्षीयमाणशरीरपोषणेन, प्रत्यवाय-हेतुपरिहारेण च; यथा दीपपरिपालनं स्नेहवर्ति-दानात्पोषणेन क्रियते, तथा शलभवातादिनिर्वापक-हेतुपरिहारेण च। शरीरप्रत्यवायहेतुश्च द्विविधः-**

**बुद्धिदोषाद्विषमशरीरन्यासादिवातादिकारकः दुष्परिहरश्च कालविशेषः स्वभावादिह हेमन्तादिः कफचयादिकारकः।**

**पूर्वन्तु स्वास्थ्यपोषकहेतूनां परिपालनमावश्यकम्, पश्चात्त्वजातानां विकाराणामनुत्पत्तिकरञ्च यद्भवेत्तत्करणीयम्, अजातानामित्यादिना तु स्वास्थ्यविघातकहेतुपरिहार एव परिगणनीयः।**

वह स्वास्थ्य दो प्रकार से परिपालित किया जाता है- विशुद्ध आहार एवं आचार से सर्वदा क्षीयमाण शरीर के परिपोषण से तथा प्रत्यवाय हेतुओं (अर्थात् विघ्न उत्पन्न करने वाले हेतुओं) के परिहार से (इस प्रकार से दो प्रकार से स्वास्थ्य का संरक्षण या परिपालन किया जाता है), यथा- स्नेह और वर्ति से दीप का परिपालन पोषण के माध्यम से किया जाता है तथा कीट-पतंग एवं वायु के झोंके इत्यादि से (जो कि दीप के बुझाने के हेतु हैं) उनके परिहार से दीप का संरक्षण किया जाता है, पहले तो स्वास्थ्यपोषण हेतु का परिपालन आवश्यक है तथा बाद में अजात विकारों का जो अनुत्पत्तिकर होता है वह करना चाहिए। अजातानाम् इत्यादि से तो स्वास्थ्य विघातक हेतुओं का परिहार ही परिगणित किया जाना चाहिए।

**अत एव सर्वेष्वेवर्तुषु कालानुरूपिण्याश्चर्यायाः परिपालनं कर्तव्यम्, ऋतुचर्यापालनक्रमेऽस्मिन् वर्षाकाले विशेषेण विधेया उपक्रमाः संक्षेपेणात्रोल्लिख्यन्ते-**

**चङ्क्रमणं प्रतिदिनमेव कर्तव्यं किन्तु वृष्टिकाले मेघाच्छन्ने च दुर्दिने न कर्तव्यम्। व्यायामः, अभ्यंगोद्वर्तनम्, नस्यप्रयोगः, स्नानं, विधिनियमित आहारः, वृत्त्यर्थं कर्मकरणं, दिवाशयनं तथा गण्डूषाणां सम्यगुपयोगश्च-श्रेयस्करः भवति। एतानि सर्वाण्येव कर्माणि सामान्येन यथाशक्ति करणीयान्येव।**

इसलिए सभी ऋतुओं में कालानुरूपिणी चर्या का परिपालन करना चाहिए। ऋतुचर्या के इस पालन क्रम में वर्षाकाल में विशेष रूप से किए जाने वाले उपक्रम यहाँ संक्षेप में उल्लिखित किए जा रहे हैं, यथा-चङ्क्रमण (घूमना) प्रतिदिन करना चाहिए लेकिन वृष्टिकाल में (जब वर्षा हो रही हो उस समय) एवं मेघाच्छन्न दुर्दिन में नहीं करना चाहिए। व्यायाम, अभ्यंग एवं उद्वर्तन (उबटन) और नस्य प्रयोग, स्नान, विधिनियमित आहार, वृत्त्यर्थ कर्मकरण, दिवाशयन तथा गण्डूषों का सम्यक् उपयोग कल्याणकारी होता है, ये सभी कर्म सामान्य रूप से शक्ति के अनुसार करने ही चाहिए।

**सामान्यतया गलरोगाणां मुखरोगाणामन्येषाञ्च जीवाणुजनितानां ज्वराणां संक्रमणात्मकानाञ्च रोगाणामाक्रमणं नासिकया मुखमार्गेणैव च जायते। अत एव संक्रमणापवारणार्थं विशेषेण नस्यगण्डूषकवलानां प्रयोगः करणीयः। अत्र नस्यगण्डूषकवलानां प्रयोगस्योल्लेखः संक्षेपेण क्रियते। नस्य विषये आचार्यश्चरकः कथयति यत्-**

सामान्यतया गलरोगों का एवं मुखरोगों का एवं अन्य जीवाणुजनित ज्वरों का तथा संक्रमणस्वरूपक रोगों का आक्रमण नासिका से और मुखमार्ग से ही होता है। इसलिए संक्रमण का अपवारण या बचाव करने के लिए विशेष रूप से नस्य, गण्डूष एवं कवल का प्रयोग करना चाहिए। यहाँ नस्य, गण्डूष एवं कवलों के प्रयोग का उल्लेख संक्षेप में किया जा रहा है। नस्य के विषय में आचार्य चरक कहते हैं कि-

**ना वर्षे वर्षेऽणुतैलं च प्रावृट्शरद्वसन्तेषु त्रिषु-कालेषु गतमेघे नभस्तले चरेत्। यो जनः यथोक्तं नस्यकर्म यथाकालं निषेवते न तस्य चक्षुर्न घ्राणं श्रोत्रमपि च नोपहन्यन्ते। तस्य केशाः श्मश्रूणि वा पुनरकाले श्वेताः कपिलाः वा न भवन्ति, न च केशाः प्रमुच्यन्ते, विशेषतश्च वर्धन्ते, कृष्णाः स्निग्धाः कुटिलाः कुन्तलाः परमाकर्षकाश्च भवन्ति। मन्यास्तम्भः शिरःशूलमर्दितं हनुसङ्ग्रहः, पीनसार्धावभेदौ शिरःकम्पश्चैते विकाराः न प्रभवन्त्यन्ये च शमनमवाप्नुवन्ति। मुखं प्रसन्नोपचितं स्वरः स्निग्धः स्थिरो महांश्च जायते सर्वेन्द्रियाणां च वैमल्यो भवति बलं चाप्यधिकं तत्र जायते।**

मनुष्य प्रतिवर्ष अणुतैल प्रावृट्, शरद् एवं वसंत इन तीनों कालों में जिस समय मेघ नहीं हों, स्वच्छ आकाश हो, उस समय इसका प्रयोग करे। जो व्यक्ति यथार्थ रूप से नस्यकर्म यथासमय में सेवन करता है, उसकी आंखें, घ्राण और श्रोत्र नष्ट नहीं होते हैं। उसके केश या दाढ़ी-मूंछ अकाल में सफेद और कपिल वर्ण के नहीं होते हैं, उसके बाल नहीं झड़ते हैं तथा विशेष रूप से बढ़ते हैं और घने, काले, चिकने, कुटिल (लहराते हुए) केश अत्यंत ही आकर्षक होते हैं। मन्यास्तंभ, शिरः शूल, अर्दित रोग, हनु (ठोड़ी) की जकड़ाहट, पीनस (पुरानी जुकाम), आधे सिर में होने वाला दर्द और शिरः कम्प ये विकार उत्पन्न नहीं होते हैं और अन्य रोग भी शमन को प्राप्त हो जाते हैं। मुख प्रसन्नता से युक्त एवं पुष्ट होता है, स्वर स्निग्ध, स्थिर और महान् (गंभीर) हो जाता है। संपूर्ण इंद्रियों में विमलता होती है और उनमें अत्यधिक बल भी उत्पन्न हो जाता है।

**वर्तमानकाले युवकाः युवतयश्च शिरसि लेपनार्थं विभिन्नानां कृत्रिमद्रव्याणां प्रयोगं केशवर्धनार्थं कृष्णीकरणार्थं च कुर्वन्ति तथा केशसंरक्षणार्थं शोभनस्वरूपावाप्त्यर्थं च हानिकारकैः रासायनिक-द्रव्यैर्विनिर्मितानां ''शैंपू तथा हेयरकंडीशनर'' इत्याख्यानां प्रयोगं कुर्वन्ति, तानि विहाय यदि ते केवलस्यास्य नस्योपक्रमस्यातीवसरलस्य प्रयोगं कुर्वन्ति तदा तु केशसम्बन्धिनां सर्वेषां विकाराणां निवृत्तिर्भवति सुदृढाः दीर्घाः कृष्णाः केशाश्च जायन्ते। अत एव विधिपूर्वकः नस्यप्रयोगः करणीयः।**

वर्तमान काल में युवक और युवतियाँ विभिन्न कृत्रिम द्रव्यों का प्रयोग केशों को बढ़ाने के लिए एवं काले करने के लिए करते हैं तथा केशों की रक्षा के लिए और उनका सुंदर स्वरूप प्राप्त करने के लिए हानिकारक रासायनिक द्रव्यों में विनिर्मित शैंपू तथा हेयर कंडीशनर इत्यादि का प्रयोग करते हैं, उनको छोड़कर यदि वे केवल इस नस्य नामक अत्यंत ही सरल उपक्रम का प्रयोग करते हैं तब तो केश संबंधी संपूर्ण विकारों की निवृत्ति हो जाती है और केश सुदृढ़, दीर्घ तथा काले हो जाते हैं, इसलिए विधिपूर्वक नस्य का प्रयोग करना चाहिए।

**विशिष्टविधिमाध्यमेन संपादनीयमेतन्नस्यकर्म पंचकर्मणि प्रशिक्षितैश्चिकित्सकैरेव करणीयं वर्तते, ते तु विधिपूर्वकं संपाद्य यथोक्तान् लाभान् प्रापयन्ति। ये त्वेतद्यथोक्तं कर्म चिकित्सकमाध्यमेन कर्तुं न शक्नुवन्ति तैस्त्वन्यल्लघुस्वरूपात्मकं प्रतिमर्शनाम-कमन्यद्वा षड्-बिन्द्वात्मकं नस्यकर्म सम्पादनीयम्। एते द्वे नस्यकर्मणी जनाः प्रतिदिनं नियमेन सरलतया कर्तुं शक्नुवन्ति। यथा ह्याचार्यश्चरकः कथयति-**

विशिष्ट विधि के माध्यम से किया जाने वाला यह नस्यकर्म पंचकर्म में प्रशिक्षित चिकित्सकों के द्वारा ही करने योग्य होता है, वह तो विधिपूर्वक इसको संपन्न करके लाभ को प्राप्त करवाते हैं। जो लोग यथोक्त कर्म चिकित्सक के माध्यम से नहीं करवा सकते हैं उनके द्वारा तो अन्य लघु स्वरूपात्मक प्रतिमर्श नामक अथवा अन्य षड्-बिन्द्वात्मक (षड्-बिंदुस्वरूपक) नस्यकर्म संपादन किया जाना चाहिए। ये दो नस्यकर्म व्यक्ति प्रतिदिन नियमपूर्वक सरलता से कर सकते हैं जैसाकि आचार्य चरक कहते हैं–

**1. प्रतिमर्शः**

**स्नेहनं शोधनं चैव द्विविधं नावनं मतम्।**
**प्रतिमर्शस्तु नस्यार्थं करोति न च दोषवान्।।**
**नस्तः स्नेहाङ्गुलिं दद्यात्प्रातर्निशि च सर्वदा।**
**न चोच्छिङ्घेदरोगाणां प्रतिमर्शः सदार्ढ्यकृत्।।**

स्नेहन और शोधन दो प्रकार का नावन अर्थात् नस्यकर्म माना गया है। प्रतिमर्श तो नस्य के अर्थ को (कार्य को, दो प्रकार के स्वरूप को स्नेहन और शोधनात्मक को) करता है और किसी भी तरह के दोष को (व्यापत्ति को, उपद्रव या विकार को) उत्पन्न करने वाला नहीं है। सर्वदा प्रातःकाल और रात्रि को नाक से (नाक में) स्नेह में भीगी हुई अंगुली को देना चाहिए और नाक में लगाए हुए इस प्रकार के स्नेह को ऊपर की और नहीं खींचना चाहिए, यह प्रतिमर्श नस्य स्वस्थ मनुष्यों को दृढ़ता देने वाला होता है।

**2. संशुद्धेन ''अणुतैल'' नामकेन तैलेनाथवा ''षड्बिन्दु'' नामकेन तैलेन सर्षपतैलेन वा स्नानात्पूर्वं प्रातःकाले शयनात्पूर्वं च रात्रौ नस्यं विधातव्यम्। कर्मण्यस्मिन्प्रत्येकैकस्मिन्नासापुटे बिंदुत्रयात्मकस्य कस्यचिदपि तैलस्य निक्षेपणं करणीयम्, तेन हि नासिकया सम्भाव्यमानस्य कस्यचिदपि संक्रमणस्यापवारणे समर्थमिदं नस्यकर्म।**

संशुद्ध ''अणुतैल'' नामक तैल से अथवा ''षड्बिन्दु'' नामक तैल से या सर्षपतैल से प्रातः काल स्नान से पूर्व एवं रात्रि में सोने से पूर्व नस्यकर्म करना चाहिए। इस कर्म में प्रत्येक नासापुट में तीन-तीन बिंदु किसी भी तैल की डालनी चाहिए इससे कोरोना संक्रमण के बचाव में भी समर्थ यह नस्य कर्म है।

**गण्डूषाः विधेयाः -**

**1. वर्षाकाले नियमितरूपेण गण्डूषाः विधातव्या। सैन्धवलवणमुष्णे जले सम्मिश्र्य गण्डूषाः विधातव्याः।**

वर्षाकाल में नियमितरूप से गण्डूष करने चाहिए। उष्ण जल में सैन्धवनमक मिलाकर उससे गण्डूष करने चाहिए।

**2. चायनामकस्य वर्तमानकाले प्रसिद्धस्य द्रव्यस्य ग्रामद्वयस्य 400 मिलिलिटरजले प्रक्षेपणं कृत्वा तत्रैव च ग्रामत्रयात्मिकायाः हरिद्रायास्तथा-ग्रामत्रयात्मकस्य धान्यकस्य तथैकग्रामात्मकस्यैव च जीरकस्य प्रक्षेपणं कृत्वा समुत्क्वाथ्यानेन संसिद्धेन जलेन गण्डूषाः विधातव्याः।**

वर्तमान काल में चाय नाम से प्रसिद्ध द्रव्य को 3 ग्राम की मात्रा में 400 मिलिलिटर जल में डालकर उसी में 3 ग्राम हरिद्रा का तथा 3 ग्राम धनिया का एवं एक ग्राम जीरा का प्रक्षेपण करके उबालकर सिद्ध किए हुए इस जल से गण्डूष (गरारे) करने चाहिए।

**3. ग्रामत्रयात्मिकामारग्वधमज्जां गृहीत्वा 400 मिलिलिटरपरिमिते जले प्रक्षिप्योत्क्वाथ्य त्रिपादशेषं वस्त्रेण च पूतं तज्जलमन्यस्मिन् पात्रे सङ्गृह्य जलेन तेनोष्णेनैव गण्डूषाः विधेयाः।**

3 ग्राम की मात्रा में अमलतास के गूदे को लेकर 400 मिलिलिटर जल में डालकर उबालकर (एक चतुर्थांश जल जाने पर) तीन चतुर्थांश के अवशिष्ट करने पर वस्त्र से छने हुए उस जल को दूसरे पात्र में लेकर उस उष्ण जल से ही गण्डूष (गरारे) करने चाहिए।

**4. उष्णे जले 10 ग्रामपरिमितं मधु सम्मिश्र्य शुद्धां स्फटिकाञ्चापि ग्रामैकप्रमाणां तत्र प्रक्षिप्य तेन गण्डूषाः विधेयाः।**

उष्ण जल में 10 ग्राम की मात्रा में शहद मिलाकर और1 ग्राम की मात्रा में शुद्ध स्फटिका (फिटकरी) उस में डालकर उससे गण्डूष (गरारे) करने चाहिए।

**5. ''त्वक्'' नाम्ना प्रसिद्धस्य द्रव्यस्य चूर्णं ग्रामैकपरिमितं रजन्याश्च ग्रामद्वयात्मकं चूर्णं गृहीत्वा संक्वाथ्य तेन गण्डूषाः विधेयाः।**

दालचीनी नाम से प्रसिद्ध द्रव्य के चूर्ण को 1 ग्राम की मात्रा में तथा हल्दी के चूर्ण को 2 ग्राम की मात्रा में लेकर उपर्युक्त विधि से क्वाथ करके उबाल करके उससे गण्डूष करने चाहिए।

**गण्डूषविधिरेषस्तु गण्डूषान्गलपर्यन्तं प्रवेश्य सम्पादनीयः यो हि लोके''गरारा'' इति नाम्ना-प्रसिद्धः। एभिः गण्डूषैः मुखमार्गेण जायमानानां संक्रमणानामपवारणम्भवति, विशेषेण तु प्रतिश्या-यकारकाणां ज्वरकारकाणां च हेतूनामपवारणस्य संभावना दृश्यते।**

गण्डूष की यह विधि तो गण्डूषों को गले तक प्रवेश करवाकर संपन्न करनी चाहिए जो कि लोक में ''गरारा'' इस नाम से प्रसिद्ध है। इन गण्डूषों से मुख मार्ग से उत्पन्न होने वाले संक्रमण का अपवारण या बचाव होता है विशेष रूप से तो प्रतिश्याय करने वाले और ज्वर उत्पन्न करने वाले विभिन्न हेतुओं के अपवारण की संभावना देखी जाती है।

**मुखशुद्ध्यर्थं मुखे धार्याणि द्रव्याणि (कवलम्)-**

**धार्याण्यास्येन वैशद्यरुचिसौगन्ध्यमिच्छता।**
**जातीकटुकपूगानां लवङ्गस्य फलानि च।**
**कक्कोलस्य फलं पत्रं ताम्बूलस्य शुभं तथा।**
**तथा कर्पूरनिर्यासः सूक्ष्मैलायाः फलानि च।।**

**आयुर्वेदे 'कवल' नाम्ना प्रसिद्धो ह्येष उपक्रमः। एतेषां द्रव्याणां प्रयोगः गण्डूषार्थजलनिर्माणार्थ-मपि यथायोग्यतया यथावश्यकतया च प्रयुञ्जते चिकित्सकाः।**

मुख की शुद्धि के लिए मुख में धारण किए जाने योग्य द्रव्य (निम्नलिखित हैं)-

मुख में स्वच्छता और रुचि तथा सुगंध की इच्छा करनेवाले व्यक्ति के द्वारा जायफल, लताकस्तूरी, सुपारी एवं लवंग के फलों को तथा शीतल चीनी के फल को एवं तांबूल के पत्र को तथा कर्पूर के निर्यास को एवं छोटी इलाचयी के फलों को (मुख में) धारण करना चाहिए। यह उपक्रम आयुर्वेद में कवल नाम से प्रसिद्ध है। इन द्रव्यों का प्रयोग गण्डूष (गरारे) करने के लिए जलनिर्माण करने में भी यथायोग्य एवं यथावश्यकता पूर्वक चिकित्सक प्रयुक्त करते हैं।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

# संस्कृत-समाचाराः

'**भारती**' संस्कृत-मास-पत्रिकायाः संस्थापक-प्रबन्धसम्पादकानाम् अथ च सङ्घकार्याणां **स्तम्भ**-स्वरूपाणां '**दादाभाई**' इत्युपाह्व - **श्री-गिरिराजशास्त्रिणां** जन्मशताब्दसम्पूर्त्यवसरे 'भारती' पत्रिकाया **विशेषाङ्कस्य 'वेबसाइट' 'पाथेयकण'** इत्यनयोश्च 01 सितम्बर, 2020 दिनाङ्के भारतीभवने **लोकार्पणं** सञ्जातम्। कार्यक्रमोऽयं जयपुरस्थ-भारतीभवनतः तकनीकी-सञ्चालकाभ्यां श्रीमाधव-राघवेन्द्राभ्यों साहाय्येन विश्वसंवादकेन्द्रस्य '**वेबपेजे**' **ONLINE** प्रसारितोऽभूत्।

कार्यक्रमे मुख्य-उद्बोधकाः सङ्घस्याखिल-भारतीय-बौद्धिकशिक्षणप्रमुखाः **श्रीस्वान्तरञ्जन**-महोदयाः स्वीयोद्बोधने 'श्रीदादाभाई' महाशयैः श्रीराममन्दिरसहितेषु अनेकेषु आन्दोलनेषु सङ्घकार्यस्य स्तम्भरूपेण प्रदत्तं योगदानं संस्मारितम्। संघस्य क्षेत्रीयप्रौढकार्यक्रमप्रमुखः **श्रीकैलाशचन्द्र**महोदयो वैशिष्ट्येनाऽकथयद् यद् दादाभाई-महोदयस्य जीवने दैनन्दिनानां व्यायाम-स्वाध्याय-हरिस्मरणेति त्रयाणां महत्त्वपूर्णं स्थानमासीत्-एतदर्थं प्रत्येकं जनं प्रेरयन्तिस्म। 'भारती' पत्रिकायाः **सम्पादकः प्रोफेसर-डॉ. श्रीकृष्णशर्मा** 'दादाभाई'-विशेषाङ्कस्य वैशिष्ट्यं निरूपयन् प्राह यदस्मिन्नङ्के प्रारम्भतोऽद्यावधि श्रीमतां पुण्यश्लोकभाजां गिरिराजशास्त्रिणां विषये समस्त- वृत्तान्तेन सहैव **सम्पादक-विदुषां** संक्षेपेण ऐतिह्यं प्रदत्तमस्तीत्यपि विशेषाङ्कस्य वैशिष्ट्यम्। आतश्चाऽय-मङ्कः सङ्ग्राह्यः। आशीर्वचः-प्रदातृत्वेन रेवासा- अग्रपीठाधीश्वराः स्वामिनो (डॉ.) **राघवाचार्य**महोदयाः प्राहुर्यदियं '**सम्प्रति**' वर्षेभ्योऽनवरतं प्रकाशमाना 'भारती' पत्रिका 'दादाभाई' महोदयानामथकपरिश्रमेणैव नैरन्तर्यं भजमानाऽधुना श्री-**सुदामा-शर्मणां** प्रबन्धसम्पादक-त्वे, विद्वत्तल्लजानां **प्रोफेसर श्रीकृष्णशर्मणां** वैदुष्यो-पेतसम्पादकत्वे च नितरां चकास्ति। अस्याः पत्रिकायाः स्वरूपं सर्वथा शुद्धं, स्तरीयं संस्करणम् 'दादाभाई' महोदयानां स्मृतौशताब्दीये वर्षे समावप्य मोमुदीति चेतः। एतदर्थं सम्पादकमण्डलम् अथ च भारतीयसंस्कृतप्रचारसंस्थानस्य पदाधिकारिणः साधुवादार्हाः।

आगन्तुकानां कृते संस्थानस्योपाध्यक्षो **डॉ. नन्दसिंह** नरूकाः कृतज्ञतां प्राकाशयत्। आदौ सह-सम्पादकः **श्रीशिवशरणनाथस्त्रिपाठी** मङ्गलमा-चरितवान्। कार्यक्रमस्य सञ्चालनं सहायकसम्पादिका **डॉ. स्नेहलता शर्मा** कृतवती।

कार्यक्रमे संघस्य क्षेत्रप्रचारकः श्रीनिम्बाराम-प्रोफेसर-शङ्करप्रसादशुक्ल-श्रीमूलचन्द-विधायकः श्री-मदनदिलावर - डॉ. नाथूलालसुमन - प्रोफेसर ओमप्रकाशगुप्त-डॉ. सुधीरकुमारशर्मा-श्रीमाणकचन्द-माहेश्वरी-श्रीराजीवदाधीच-श्रीअविनाश आचार्य-प्रभृतयोऽन्येऽपि शिष्टा विशिष्टा जनाः समुपस्थिता आसन्।

**सुदामा शर्मा**
**प्रबन्धसम्पादकः**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20





**'भारती' पत्रिकायाः 'वेबसाइट्' इत्यस्य लोकार्पणं कुर्वन्तो राष्ट्रगीतं गायन्तश्च विद्वांसोऽतिथयश्च**










स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम्
अध्यक्षः शंकरप्रसादशुक्लः प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा श्याम प्रिन्टर्स, किशनपोल बाजार, जयपुरम्
दूरभाषः 0141–4001974 पत्रसंकेतः– भारतीभवनम्, बी–15, न्यू कॉलोनी, जयपुरम्–302001

प्रतिष्ठायाम्,